CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 756

Title Vidagdhamukhamandana
Tikā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 756. Subject: Kāvya.

Title: Vidagdhamukhamandana tīkā

Author: – Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 11.1" by 6" Extent: 50 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

देवदत्तस्य

पु·१२

प॰ ॥ ॐ नमः सिद्धेभ्यः ॥ चिद्योद्धिव्ययमर्म्मनिदनलसत्कं गीरवं प्रोल्लसद्दिग्भेदांश्चि सुरेजयुग्ममंडलं सोमाग्यसोरस्पदं । त
ल्लोलत्क्रमणोस्तु कल्पमरसद्वंद्वादयगीतं तुकुंवीदस्तु शिपरागराजितमति प्राभुर्यकार्यन्वदं ॥१ नीरक्षीरविवेकिनः परममी दंसा
जयंति द्विता वाचामं तिपयः पयःपुनरिदं निंदंति नो नंदिनाः धिगुढुष्टानुपरदोषस्पृष्टद्दयानुकिं वा नया चिंतयाल्लुकायुक्त वि
दस्त एव मम वेदालंबनं जाग्रति ॥२ करुणा दयार्थवर्णाः संति यद्यपि वादिनः गुणंतथापिकवयो[illegible]तिकवि सत्कृते ॥३ यो र्थः
कथितो प्रथितो गुरुभिः श्रीजहदेवाभिः उक्तं गते सव्याख्या ॥   विरचयितुं मम मनस्तमेवार्थं ॥४ यद्यप्यदिंसगयति स्म स
धर्म्मदाससस्तन्नको पिकलये दितिडुगदासः श्रीवासुद॥   वतनायाविनयाप्नोति मुग्धस्तविदग्धमुखमंडननव्यटी॥
कां॥५ ग्रंथकृत् ग्रंथादाविष्टशिष्टाचारपरिपालनार्थं ग्र॥   वचनान्येव वस्तु काव्यसुखं प्राप्नोति ॥ सिद्धौषधानीति ॥ त
थाच दंडी ॥ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति ॥ तत्रायमन्वयप्रकारः ॥ शुद्धोदनो नृपस्तस्यापत्यं शौद्धोद
निः तस्य बुद्धस्येत्यर्थः । प्रकृष्टानि वचनानि प्रकर्षेणोच्यंत इति प्रवचनानि आगमवचनानि । अनूचानः प्रवचने सांगे इ
त्यमरः । चिरं बहुकालं जयंति सर्वोत्कर्षेण वर्त्तंत इति कीदृग्विधानि । भवसंसारदुःख…तान्येव महागदाः रोगाः रोगव्या
धिगदामया इत्यमरः । तेषां सिद्धौषधानि दृढतरनिरापद्क्षाणि । औषधानि भेषजानि तेषजं जौषधभैषज्यानीत्यमरः । पु
नः कथंभूतानि गुणपात्मनां सुपुरुषाणां परमकर्णरसायनानि कर्णयो रसः अनुरागः गुणेरागे द्रावे रस इत्यम

२

रः तस्मिन् अयनानि वर्त्मानि । अयनं वर्त्म मार्गेत्यमरः । परमाणि मनोहराणि वचनानि कर्णरसायनानि चेति समासः । अथवा अ
थवा परावृकृष्टा माश्रीर्यस्मिंस्तानीति समासः पुनः कथंभूतानि मनोमलानां मनःपापानां प्रक्षालने निर्मलीकरणे एकसलिलानि मु
ख्योदकानि । एके मुख्यान्यकेवला इत्यमरः ॥ ७ इदानीं स्तुतिसोमप्रसिद्धये सतः कवि…रश्च जयशाहे नत्वोति । जयंतीति । सुरु
तिकृत्प्राज्जनं पुण्यैकपात्रं । योग्यभाजनयोः पात्रमित्यमरः । पुण्यश्रेयसी सुकृतमित्यमरः । संतः सत्पुरुषा जयंति सर्वोत्कर्षेण वर्त्तंते ।
पुनः किंविशिष्टाः परार्थसंपादनसद्वृतस्थिताः परेषां अर्थः प्रयोजनं । अर्थोभिधेयारवस्तुप्रयोजननिवृत्तिमित्यमरः । तस्य संपादनं कर
णं तदेव सद्वृतं संनियमः । नियमो व्रतमस्त्री तच्चोपवासादिपु   एयकमित्यमरः । तत्र स्थिताः पुनः किंविशिष्टाः करस्थनीरोप
मविश्वदर्शिनः । करस्थं च तन्नीरं चात नउपमीयत इति करस्थ   नीरोपमं तच्च तत् विश्वं च तत्पश्यंतीत्येवंशीलाः संतो भवंति
अथवा करस्थनीरोपमविश्वं पश्यतीत्येवंशीलः करस्थनीरो   पमविश्वदर्शी । तस्य कवेरिति योजना । पुनः किं० विशिष्टाः वे
दग्ध्यपुवः चातुर्यभूमय इति वा विशेषणं । अथ कवेरपीति दीपकं । ईदृशा वाचः जयंति ॥ ८ इदानीं परगुणकथनेन सूक्तानां वादं ॥
कान्निंदति ॥ आक्रांतेति । इदं सतीत्युणवनी जिह्वा रसानना परगुणान् अन्यगुणान् वक्तुं निर्दृष्टुं …शक्ता । असमर्था । खलस्य सं
दुर्जनवदने विश्वेनोद्धर्जुनः खल इत्यमरः । संजद्यते दृश्यते । उत्पद्यते । लोहशलाकया । विहवलोहस्य अयसः शलाका से
होसीशस्त्रकं तीक्ष्णं पिंडंकालायसायसी इत्यमरः । पुनः कथंभूत्पद्यते । मदोपलेन महाश्मा सा पलस्य पाषाणप्रस्तरग्रावोपलाश्म
त्यमरः । तेन आक्रांत वशास्त्र वा पुनः कथंत्पद्यते दुर्वासिसा मुनिना शासवाशापि कवलो दिदुर्वासाः श्रूयते पुनः कथंत्पद्यते । विषेः

गरलैः। क्ष्वेडस्तु गरलं विषमित्यमरः। मूर्छा कश्मलं मूर्छा च विकश्मलं मोह इत्यमरः। प्राप्तेव नीनिव। पुनरुत्पद्यते अतनुस्तु पिबद्देवाच
तनवश्चताः रजवश्चताभिः बद्धेव। एतावता खलस्तु रवमुत्प्रणत्तुक्तं भवतीत्यर्थः॥९ इदानीं सत्पुरुषा अपि कतिपु चित्स्वार्थमंतरेणापि
स्तत्रयं थ प्रवृत्तिप्रयोजकानू प्रतिपादयितुमाह॥ शाहति॥ इह अस्मिन् संसारे निश्चयेन च द्वौ वा विहजनाः वसंत्यव किं कुर्वंतः। अ
नवरतं स्वस्योपकारकारिणि प्रत्युपकारं कुर्वंतः। कृतं जानंतीति कृतज्ञाः। येषां स्वप्रयोजनं विना परकार्यव्यसनिना भवति परोपका
रव्यसनमस्यास्तीति परोपकारव्यसनी तस्य भावः। पुण्यपरियाक प्रीतिमंतः सत्पुरुषाः कियंतः॥१० इदानीं युगपदेवासज्जनस
ज्जनौ तदा कर्णमीत्यत्र भयसुखनिवृत्त्युत्पत्त्यर्थं प्रणमामीत्याह॥ एषांजलिरिति। यो अत्यर्थं कुटिलप्रगुणस्वभावो वक्रमृदु
स्वभावौ। तौ असज्जनसज्जनौ सकृदेव वंदे॥ एष अंजलिः। तोऽस्तुना वंजलिः पुमानित्यमरः। इहासज्जननमस्कारस्या
प्रयोजकत्वात् किमिति नमस्कारणीयोऽदुर्जन इत्याशंक्याह॥ द॥ एकं भियेति। अभिसंधिर्निगीतिः निरभिसंधि निरभिसं
धिरस्य। संजातं इति निरभिसंधितः निरभिसंधितः विरभावो यस्य सः अभिसंधिरभिप्राय इत्यमरः। तं एकं दुर्जनं भियाभये
न वंदे। अपरं सुजनं। परमा चासौ निर्वृतिश्च निर्वाणं निर्वृतिः। मोक्ष इत्यत्र निर्वृत्तिः परमानंद इति क्षीरस्वामी व्याख्यात्।
तस्याः पात्रभूतं भाजनरूपं। परमसुखभाजनं प्रीत्या वंदे॥११ इदानीं पुनः दुर्जनान् तिरस्कृत्य सुजनानेव प्रशंसन्नित्रम
ह॥ किं मय्याविति। अथवेतिपक्षांतरे। हतखलेन निंदितखलप्रणतावधि नमस्कारे कृतेऽपि मम किं स्यात् किं भवेत्। गुण
णान् जानातीति गुणज्ञः सुजनः। हृदुदुयदि। यदायस्मिन्यदि कुडु इति हुड्डुराह्वाय इत्यर्थ इति हैमीनाममाला॥

२

सः प्रसिद्धं मां स्वीकरोतु अंगीकुर्यात्। अत्र लिङर्थे लोट्॥ अत्र प्रकारांतरेण दृष्टांतमाह॥ चंद्रेणेति। विकाशहेतुत्वात्मनोध
रचरित्रेण चंद्रेण कुमुदं विकासितं सत् अंधकारैः किं मुकुलीकृतं भवति। अपि तु न भवत्येव। सिते कुमुदकैरव इत्यमरः॥१२ इ
दानीं ग्रंथकृत् प्रतिपाद्यमर्थं प्रतिपादयितुं प्रतिजानीते॥ प्रीत्यै सतामिति तदनुभावगताः प्रसादः तेषां सतां प्रायमनुभावः प्रभावः त
न दूरीकृतः। अवसादो मतिमांद्यरूपः खेदो यस्य सतथोक्तः। अहं सतां प्रीत्यै प्रतिभाहृद्रूपे स्वशास्त्रगुणं यथा भवति तथा प्रपं
च रहितं विदग्धमुखमंडनं वक्ष्ये कथयिष्यामि। कथंभूतं। द्विप्रावबोधकरणक्षमं। झटिति प्रतिभाविक्षणसमर्थं पुनः किं विशिष्टं एदिता
र्थं ई। पदिताः दृष्टाः अर्था लाभपूजाख्यातिरूपाः यस्मिन् ईदृशं। तार्थं अथवा ईदिता स्तकिंतिः अर्थं अभिधेयो यस्य तत्। किंच
वा। गूढरचनां यज्ञनिर्माणं परिहृत्य निर्दिग्धमेयचितग्रूढग्राह इत्यमरः। अवबोधः प्रयोजनं तत्कामः अधिकारी। वाच्यवाच
कभावः संबंधः। वाचकं विदग्धमुखमंडनं वाच्यं। व्यस्तसमस्ता दितयोः संसर्गः संबंधः। इत्येवं संबंधचतुष्टयं॥१३ इदानीं
नीसीं ग्रंथे ग्रंथे परस्य चित्तपरितापमुत्पादयन्नाह॥ यद्यस्तीति। भो विदुषः यदि सदा सितत्वं चमनोऽस्ति तर्हि विदग्धमुखमं
डनं तांबूलमिव गृह्यतां चाविप्राता। प्रवेशं कुरुत। मनोरागप्रवृत्तिहेतुत्वमेकस्य अधररागप्रवृत्तिहेतुत्वं चमपरस्येति रा
गहेतुत्वस्य साधारणत्वात् विलंबो न कर्तव्य इत्यर्थः॥१४ इदानीं प्राकृरितिदशभिरनवाद्यैः पाद्यैः रुद्रशास्त्रस्वरूपं निरूप्य तत्रा
दौ वेवव्यस्तसमस्तयोर्लक्षणामकपद्येनैवाचाते॥ प्रश्नमिति। पदानां विभागः पदविभागः तेन केवलेन वइतरापेक्ष्या विनायसृष्टं
भवति। पृष्टश्चात् स्मः। स्तनासीर इति। न तु व्यस्तं। यत्समुदायेन समस्तपादनं अविभागपदेन पृष्ठात्। प्रश्नः क्रियते। ततु सम

स्तमिति वदंति॥१५ इदानीं व्यस्तस्योदाहरणद्वयमाह॥ एवसर्वत्रोदारणद्वयं द्रष्टव्यं॥ प्रजायामिति॥ प्राश्निको वदति
प्रजायां अचीनकिंपदं उत्तरं सुखतीप्रजायामिति पाणिनिस्मरणात्॥ अव्ययत्वात् विभक्तिलोपः अस्तनं कचरदितं वदरस्तु॥
लेकः बिभर्त्तिना॥ पुरुषः॥ प्रलंबासुरविद्विषः॥ प्रलंबश्चासावसुरश्च प्रलंबासुरः तस्य विद्विट्॥ तस्य बलभद्रस्येत्यर्थः॥
आयुधतया आयुधत्वेन कख्यातः प्रसिद्धः॥ उ॥ सीरः हलं॥ हथेकोलांगलं हलं॥ मादारणं वसीरेइत्यमरः॥१६ इदानीं द्वितीय
मुदाहरति॥ काउरा[illegible] स्यति॥ कुष्ट[illegible] श्चासावा[illegible]श्च आढ्योधनीत्यमरः॥ तस्य मोहाय मूर्छायै मूर्छकस्य लंमोहइत्य
मरः॥ कः प्रवत्ता॥ उ॥ राः॥ धनं॥ अर्थारिविभवानरीत्यमरः॥ मु[illegible] रस्य विद्विट्॥ तस्य कृष्णस्य का प्रिया वनिता॥ उ॥ मा॥
लक्ष्मीः॥ प्रश्नवितर्कश्च॥ किंपदं॥ उ॥ नु॥ नु प्रच्छायां विकल्पे च त्यमरः॥ [illegible] तेछदस्य अधरस्य भूषणं अलंकारः कः
उ॥ रागः॥ अरु॥ णिमा॥१७ इति व्यस्तजातिः॥ उ॥ इदानीं नु हे शानुक्रमेण समस्तमाह॥ ॥ अपिसेविताइति॥ द्वि
जिह्वः सविता अपिसर्पैः॥ अथ वस्तु च किः॥ सेविताः आश्रिता अपि द्विजिह्वा सर्पखचकावित्यमरः॥ कदापि कनो वि
कारमायांति कदाचिदपि केविकारं नायांति॥ उ॥ वरां॥ मलयतरवः॥ चंदनवृक्षाः॥ किंच विछिद्यमानतनवः विछिद्यंतइति विछि
द्यमानाः तनवः विछिद्यमानशरीराः संतः स्वगुणैः सुगंधवादिभिः सोरभ्यादिभिः अदायादिभिश्च अधिकं यथा भवति तन
थाके विराजंते शोभंते॥ उ॥ मलयतरवः चंदनवृक्षाः॥ समस्तेन अविभागेनानेनपदेन पृच्छ्यते॥ अतः समस्तमित्या
हुः॥१८ अन्यदप्युदाहरति॥ अनिभृतइति॥ अनिभृतः चंचलः निभृतः स्थिरः॥ स्थिरनिभृतविनीतप्रश्रिताः समा॥

द २

v ने४

मा

इत्यत्र निभृत अचपलइति क्षीरस्वामीव्याख्यात्॥ तथा च निभृतद्विरेफमिति कालिदासोक्तेः॥ अनिभृताः अचपलाः द्विरेफा
यत्रेति तत्र व्याख्यानं॥ तत्र च ते कोकिलाश्च तेषां कोकिलानां निस्वनः तेन मुखरितं सदकारकाननमाम्रवणं यस्मिन् स तथा॥ उ॥ कः पुं
सां हृदयहारी मनोहारी भवति॥ किंच मधुकरझंकारिकं कस्मिन् मधुकरझंकारो विद्यते येषु तत् मधुकरझंकारिणः॥ कं किस्मिन् यस्मि
न्स तथोक्तः॥ कः॥ उ॥ मधुसमयः॥ वसंतसमयः॥ कं॥ कस्मिन् रवोक इतिं हिमी॥ इति समस्तजातिः॥१९॥ ॥ इदानीं द्विव्यस्तद्विःसमस्तक
लक्षणं सकृदाह॥ व्यस्तं समस्तमिति॥ व्यस्तं अथवा समस्तं समासपदभंगतः॥ समासे स्थितस्य पदस्य भंगतः विछेदात् यत् द्विः पृष्ठं स्या
त् द्विःपृष्ठेत॥ हाभ्यां प्रकाराभ्यां द्विः॥ द्वित्रिचतुर्थ्यः सुजितिपाणिनि॥ निस्मरणात्॥ तदेव द्विव्यस्तं द्विःसमस्तकमपि स्यात॥२० तत्र द्वि
व्यस्तमाह॥ वर्षास्विति॥ वर्षासु का भवति॥ स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्य मरः॥ उ॥ कालिका॥ मेघजाले च कालिकेत्यमरः॥ निर्मधु मधुरहितं
पुष्परसरहितं॥ मधु मद्ये पुष्परसे इत्यमरः॥ अंबुजं कमलं कीदृ क्॥ उ॥ अपालि[illegible]पगताः॥ अलयः भ्रमराः यस्मात् तत् वसुधा
सहिते पृथ्वी उक्तं॥ धाय्यं कः॥ एकः बिभर्त्ति दधति॥ उ॥ कमठः॥ कूर्मे कमठकच्छपावित्यमरः॥ धरणीधरराजपुत्री॥ धरंतीति धराः॥ धर
एयाः धराः तेषां राजा धरणीधरराजः॥ अत्र राजाहः सखिभ्यः टजिति टच्॥ हिमाचलः तस्य सुता पार्वती तां आमंत्रयस्व संबोधय॥ उ॥ हकालि
काली हिमवतीश्वरीत्यमरः॥ अत्र अ[illegible]स्थित समनिचितां गजनाश्रयः॥ अस्थीनि च तस्मान् निचितेः निचितं व्याप्तं अंगं यस्य स तथा सोज
न[illegible]श्च तस्य आश्रयः आधारः कः॥ उ॥ कापालिकमठः॥ कोलिकानां मंडपविशेषः॥ मठश्छात्रादिनिलय इत्यमरः॥ अत्र समासप
दभंगात् वारद्वयं व्यस्तमेवोक्तमिति द्विर्व्यस्तं॥२१ अन्यदप्याह॥ कीदृशमिति॥ मउरकंठं कीदृशं मतं॥ वदकथय॥ उ॥ अवारिनवि

द्यूते वारि यस्मिन् तत् अवारि। कुत्र सति कस्मिन् सति द्वारि द्वारे रक्षणं भवेत्॥ ७ ॥ तोरणे सति। हे कांत प्रियबुद्धिकथयास
कार्मुकिः धनुर्द्धरः॥ सुभटयोद्धा॥ विद्विषा वैरिणा कुत्र कस्मिन् कीदृशो भवति। ७। रणमुद्धे अवारितः निवारयितुमशक्यः
॥२२ इति द्विव्यस्तजातिः॥ इदानीं द्विःसमस्तमाह॥ पक्षिश्रेष्ठेति। पक्षिश्रेष्ठश्च सखी च बल्लभश्च भूमा च एताः कथं वाच्याः॥ व
दात॥ विवरालीनकुलीराः। विस्तु पक्षिषु वरः श्रेष्ठः आली सखी नकुली नकुलस्त्री। इरा पृथ्वी। विवरालीनकुलीराः। विव
रश्च आली च नकुली च इरा च विरालीनकुलीराः खुरा वाच्या इति पाठे इरा मदिरा ज्ञातव्या। इरा भूवाक्सुरासु स्यादित्यम
रः। विस्तु लेन कुले विह्गा बल्लभः स्यात् त्रिलिंगले त्रिष्वित्यमर ॥ स्त्रीलिंगबल्लभः। बल्लत्यपि वाताद्युणवचना दितिपा
णिनिस्मरणात्॥ ज्येष्ठे मासे शोषं गताः प्राप्ताः अल्प जलाः ईषदुदकाः भुवः भूमयः कीदृश्यः। ७। विवराली
नकुलीराः विवरे सुराध्र सुषिरं विवरं बिलमित्यमरः ।आसमंता ह्लीनाः कुलीराः कर्कटकाः यासु ताः। स्या
त्कुलीरः कर्कटक इत्यमरः। इद्वारद्वयं समास्तनोक्तत्वात् द्विःसमस्तकं। ननु त्रयत्रापि समासपदभंगेनोक्तत्वात् द्विव्य
स्तद्विःसमस्तयोर्भेदाभाव इतिचेत्। तत्र एकत्र सामस्त्येन प्रश्नजाकांक्षा इह रक्तत्वात्। अपरत्र अतथाभावात् भेदः॥२३ अ
न्यदप्याह॥ विश्रृंखलेति विश्रृंखलाः श्लेमिः प्रलंबघ्नो बलभद्रः। बलभद्रः प्रलंबघ्न इत्यमरः। व्रीहिः। अन्नं। आशुर्व्रीहिः
पाटलः स्यात् शितशूकयवौ समावित्यमरः। मानुषः। मानवः। संयत् युद्धं। स्त्रियाः संयत्समित्याजिसमिद्युध इ
त्यमरः। एताः कथं वाच्या भवंति। ७। कुवलयवनराजयः। कुश्च वलयश्च यवश्च नरश्च आजिश्च ताः। किंच। दिनांतकाः विक

संति। ७। कुवलयवनराजयः। कुवलयानां वनं तस्य राजयः पंक्तयः। श्रेणीरेखा तु राजय इत्यमरः। स्यादुत्पलं कुवलय
मित्यप्यमरः॥२४ इति द्विःसमस्तजातिः॥ ७॥ ॥इदानीं व्यस्तसमस्तमभिधातुं तल्लक्षणमाह॥ पृष्टमिति॥ यत्र प्रथमं
पदविभागेन तदनु समुदायेन पृष्टं भवेत्। पृच्छा तस्मात् तत् व्यस्तसमस्तं विदुः प्राहुः। व्यस्तं च तत् समस्तं च तत् समं
स्तं च। कीदृग्विधं उभयार्थप्रदर्शकं॥ एकस्मिन्नेव पदे व्यस्तस्य समस्तस्य च अर्थस्य प्रकाशकमित्यर्थः। एकत्रैव व्य
स्तसमस्तलक्षणोपेतत्वात् तदुदाहरति॥२५ का प्रियेणेति॥ मुनेः मरीचेः अत्रेः गृहे प्रियरहिता का। अंगना। के
न तनयेन पुत्रेण नंदिता आनंदिता। आनंदिंशा पिता। उदरांशा कुंतलाभरा तनपक्षिणा ... बंधनं कीदृश
न पुरुषेण सदा नित्यं समभिलष्यते। आकांक्ष्यते। ७। शकुंतराभरतनाः शकुंतानां पक्षिणां लाभः तत्र रात
ना। शकुंति पक्षि शकुनि शकुंत शकुन द्विजा इत्यमरः ॥२६ अन्यदप्याह॥ कीदृशमिति॥ हृदयं हरतीत्येवं॥
शीलं कूजितं कीदृशं भवेत्। ७। कलं मधुरं॥ ध्वनौ तु मधुरास्फुटे। कल इत्यमरः। चूपतेः राज्ञः यशसि कः सखा मतः सम
तः। ७। कविः कविमंतरेण। यशो न भवतीत्यर्थः॥ तथाच॥ काव्यं यशसेऽर्थकृते। विपिने वने भयेन आकुलः तव ते
। कास्ति वर्जीत॥ ७। अहितः। शत्रुः। निशाकरश्चंद्रोऽपि कीदृशो न भवेत्। ७। बलं कविरहितः कलंकेन विरहितो न भव
ति। अपितु कलंक सहित इत्यर्थः॥ इति व्यस्तसमस्तजातिः॥२७ इदानीं द्विर्व्यस्तकसमस्तकमभिधातुं तल्लक्षणमाह
। द्विर्व्यस्तमेव तिष्ठेत्तत्र कंद्विर्व्यस्तमेव पृष्टं चेत्। ततः तदेवापरामकं समुदायेन भवेत्। एवंच सति त्रिधाभिन्नं त्रि

त्रिः प्रकारैः भिन्नं भेदयुक्तं यत् । तदेव द्विर्व्यस्तसमस्तकमाख्यातः ॥ २८ इदानीं तदुदाहरति ॥ को शांकरस्येति । शांकरस्य
ईश्वरस्य वलयो कटाक । कटकं वलयो स्त्रियामित्यमरः ॥ को । उ । अदी । सार्या । अपयोधरः स्तनरहितः कः । स्त्रीस्तनाब्दौ
पयोधरावित्यमरः । उ । नानरः । परस्य शत्रोः वशं अधीनतां कीदृक् नृपः स्यः नियतं । निश्चयेन । प्राप्नोतीति । उ । हृतनयः
। हृतः नयः नीतिमार्गो यस्य स तथोक्तः ॥ उरगस्य सर्पस्य पतिं स्वामिनं संबोधय । उ । हे अदीन । अहेः सर्पस्य इनः स्वामी ॥ न
स्य संबोधनं । इनः सूर्यप्रभावित्यमरः । विजयी । जयशीलः । कीदृग् भवति । उ । अहृतनयः । न हृतः अहृतः अहृतनयो यस्य
सो अहृतनयः । चकारः समुच्चयार्थः । द्विनिश्चयेन । दुर्यो … धनश्च कीदृशो न भवेत् । उ । अदीनाहृतनयः । न दीने अदी
न संहारार्थ अहिलीन त्रेयस्य सः तस्य तनयः । पुत्रो न भाव … तु किं च दीनाहृतनयः दीनाद्धो धृतराष्ट्रः तत्पुत्रः अत्र व
दुर्योधो स कथ्यते । स्वांगात् … इति … अदंत … ना । यथा पुंडरीकाद्दृशः ॥ २९ ॥ अन्यदप्याह ॥ का
मा ह्वायति । हरीश्वरस्य दुष्टपातः दुःखोपार्जितधनासक्तमनसः । माह्वायकः विदितः । उ । राः । धनं । अर्थी रैविभवान रीत्य
मरः । गुरुर्बृहस्पतिः संबोधनीयः । संबोधयितुं योग्यः तं संबोधय इत्यर्थः । उ । जीव जीव आंगिरसो वाचस्पतिरित्यमरः । वि
हित इति यावत् उ दुष्टधनिकमोदायकः विदित इति योजना । भवत्यां भ्रामोकः विरलः । उ । सन् सत्पुरुषः । नवघनः । नू
तनमेघः । आषाढांते दृश्यमानः किंवत् । कुरिव दृश्यते । उ । इभवत् गजवत् । वर्षतिः पुरातनस्य जार हिष्ठः ता स्यात् त
था वोपमेय वदानिः स्यात् । अतउक्तो … द्विजः ब्राह्मणः ॥ कीदृग् भवति । उ । अनः । अः कृष्णः न विद्यते यस्य

५

सतथोक्तः । कृष्णरहितो न भवेदित्यर्थः । अन इत्यत्र । नलोपो नञ् इत्यनेन नकारलोपः । तस्मान्नुडचीति नुट् खलेखावचनं
का । येन वचनेन खलेति ज्ञायते । उ । राजी । कृदिकारादक्तिन इति वा ङीप् । रेखा स्यु राज इत्यमरः । रलयोरैक्यं । खलः दुर्जनः ॥
अतिशयं च शं दुःखाय कीदृग् भवेत् । उ । वसना । गृहे वसन्निव दुःखजनना का भवतीत्यर्थः । विघ्नाधिपतिः कः । उ । इभवदनः गज
मुखः । घृत्यान्तिसीरणा । स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः । मनोभवसमः कंदर्पसमः सुमान् पुरुषः कीदृशः स्यात् । उ । राजीवसन्नि
भवदनः । राजीवन कमलेन सन्निभं सदृशं वदनं यस्य स तथोक्तः ॥ ७ ॥ ॥ इति द्विर्व्यस्तसमस्तजातिः ॥ ३० ॥ ॥ इदानीं द्विः सम
स्तव्यस्तकमभिव्यक्तं तल्लक्षणमाह ॥ द्विःसमस्तमिति ॥ य … द्वा द्विः समस्तं द्वाभ्यां प्रकाराभ्यां समस्तं पुनः व्यस्ताकष्ट
षु भवति । इत्युच्यते स्म । तत्प्रश्नपंक्तितः द्विःसमस्तकव्य … स्तं कथितं ॥ ३१ ॥ ७ ॥ तदुदाहरति । कीदृक् इति सुराज्ञः स
रूपातः न पुनः जनादिति टचः प्रतिषेधः सकलजनः स … कालालोकः कीदृशो भवता । उ । विधुरविरहितः । विधु
रेण दीनेन । विधुरो दीन इत्यपीति विश्वः । विरहितो भवतु । इह जगति अंधकारदेत्ज्ञः कः कालो विदितः । उ । विधुरविर
हितः । चंद्रसूर्याभ्यां रहितः । कुमुदवनस्य कः । प्रयाना । उ । विधुः चंद्रः । विधुः सुधांशुरित्यमरः । आटवंश … शिरसा
को निंदति । आरव्यो … द्विषावित्यमरः । अनुसयान्न इति पाणिनिस्मरणात् । उ । अविमिषः । अवयः … मषा
कीड़ित्यमरः । मस्तकयुद्धं मष एवा करोति । क्रयाकः जितः । उ । अदितः शात्रुः ॥ ३२ अन्यदप्याह । … इति । संग्राम
युद्धः क्रयास्फुरदसिना । स्फुरता खड्गेन । कयाप्न … जिताः दैताः । उ । नरकरणावः । नराश्च करेणवश्च नरकरेणवः ॥

करेणुरिभ्यां स्त्री नेभे इत्यमरः। इभेन हस्तिनीना। स्वल्लिंगः। निरये नरके। निरयो दुर्गतिस्स्त्रियामित्यमरः। नरकस्यड
स्वंपंडांके। कंकुरुः। उ। नरकारणवः नरकस्यारणवः। अथवा नरकेरेणवः। रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः। क
स्मिन् लोम। रोम तनूरुहं रोम लोमेत्यमरः। कदाचन नैवोद्भवति। नोत्पद्यते। उ। नरकरः। मनुष्यहस्तः। मनुष्यपद्मा
हे स्त्री प्रकृतीनामपि। भयति संसारे सदा नित्यं। लघुत्वभाजः। लघुत्वं प्राप्नुवंतः। के। उ। अरणवः। कणाः। लवलेश
कणाणव इत्यमरः। अथ मंत्रारद्वयं सामस्त्येनोक्त्वा तु। ततः वारमकं व्यस्तेनोक्त्वा च द्विः समस्तकव्यस्तं। इति
द्विः समस्तकव्यस्तजातिः॥२३॥ ॥उ॥ इदानीं मेकालापकं निगदितुं तल्लक्षणमाह॥ एकश्चेत्यो
ति। वचः कर्ह। यत्र यस्मिन् सारएकश्चन्यासरूपं वर्णमात्रेण भिन्नार्थस्य अर्थांतरस्य प्रदर्शकं प्रति
पादिकं॥ भवति॥ तदा द्विः समस्तस्यतं प्रभेदामव एकालापकमिति विदुः। प्राह॥ इदानीं तदुदाहरति
॥कीदृशीति। परमपापकर्मभिः। उत्कृष्टपापकर्मविद्यतेयेषां ते तथोक्ताः। कीदृशी निरयभूः। नरकभूमिः॥
अनेकधनवत्कुभिः प्रकारैः सव्यथा॥ उ॥ नरकपालचिता। नरकं पालयंतीति नरकपालाः तैः चिता व्याप्ता। प्रे
तराक्षसपिशाचसंकुला प्रेताश्च राक्षसाश्च पिशाचाश्च तैः संकुला व्याकुला। पितृकाननस्थली श्मशान। न
भूमिः। श्मशानं स्यात्पितृवनमित्यमरः। सा च कीदृशी भवति॥ उ॥ नरकपालचिता। नराणां कपाल
निभिः चिता व्याप्ता भवति प्रेतभूः॥ उ॥ २४॥ अन्यदप्याह॥ केसरतीति। केसरद्रुमतलेष्वकुलवद्द

तलेषु। अधःस्वरूपयोरस्त्री तलं स्यादित्यमरः। मत्तकुंजरः। मदोन्मत्तगजः निश्चलः कीदृशो भवति। उ। नरमेततादा
नवकुलभ्रमरहितः। दानेन मदोदकेन वकुलभ्रमराणां केसरषट्पदानां हितः। यदा भवति तदा निश्चलो भवति॥
अथ केसरवकुल इत्यमरः। अर्जुनः समितिषु युद्धलक्षणेः उत्यद्यमानाचष्टा विशाखे। तवतः सत्यज्ञान। शिवं शंकरं अ
वत्य ज्ञात्वा कीदृशः अभवत् जातः। अवाप्तिपा गतवतः लक्षणेश्च दृष्ट्वा कीदृक् अभवत्॥ उ। दानवकुलभ्रमरहितः। दानवानां
कुलं तस्य भ्रमः तद्रहितः। ईश्वराय मिलित्वा वा अयं दानवरहितश्चांति गतेत्यर्थः। एकं। एकवारमेव अर्थद्वयमालपतीति एका
लापकं॥ इत्येकालापकजातिः॥ उ॥ २५॥ ॥ इदानीं सप्त प्रकारं चतुर्दशादौ दरणार्थकं प्रभिन्नकमभिधातुं तल्लक्ष
णमाह॥ शाब्दार्थेति॥ शाब्दार्थलिंगवचनैः शाब्दाश्च अर्था॥ श्च लिंगानि वचनानि च तैः व्यस्तैः अथवा समस्तैः भिन्नं
तत्प्रभिन्नकमुच्यते। यं वस्तु शाब्दार्थलिंगवचनविभक्ति षु मध्ये द्वाभ्यां त्रिभिश्चतुर्भिः पंचभिर्यद्भिन्नं स्यात् तत्प्रति
भिन्नकमुच्यते॥२६॥ ॥इदानीं सप्तविधप्रभिन्नके प्रथमतः शाब्दार्थलिंगप्रभिन्नमाह॥ निर्जितेति॥ निर्जिताः सकलाः अरातय
शत्रवः। येन सः। पृच्छति प्रश्नं करोति। तं संबोधय॥ उ॥ विधुतारातेः। विधुताः तिरस्कृताः अरातयो येन स तस्य संबोधनं॥ क एकः स्व
त्वोत्सवागात न यं न प्रकृतिं न प्राप्नोति। कः गतो॥ उ॥ अजः। न जायत इत्यजः। परमेश्वरः नित्यः। मिथ्या स्यात्। मिथ्यात्वावन
कृताः रुचिराः मतोदराः आशाः दिशाः यस्याः सा तस्याः निशायाः रजन्याः तिमिरक्षयकारिता मा विध्वंसकारिणी॥ उ॥ विधु
तारा भजः। विधुश्चंद्रः तारा नक्षत्रं तयोर्द्वीप्तिः॥२७॥ ॥अन्यदप्याह॥ विदग्धपतिरिति॥ विदग्धपतिगरुडः कं आदित

शत्रुं हतवान् । जघान ॥ ७ ॥ अहिंसयेति । जनमर्दितं लोकैः अज्ञं पुरं कीदृग् भवति ॥ अ ॥ अवकरकरदितं । नामधेयः करोत्व
लिरित्यमरः । बोधीन्द्र नु बुद्धिमान् । कठिनं किं विदित प्रसिद्धं । वद कथय ॥ ७ ॥ अयः लोहं । लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिंडं
कालायसायसी इत्यमरः । यादसां जलजंतूनां पतिः स्वामी । सोपि कीदृक् । कुनयकृत् नयकारी ॥ ७ ॥ अहिमकरमयः । तत्र
कृतवचानमयइ इति मयट् । सर्पमकरप्रचुरः । इदं कत्वमयश्शब्दः अपरत्र सांतः अयः शब्दः शब्दभेदात् अर्थभेदोपि अ
यः नपुंसकलिंगः मयः पुल्लिंगः । एवं च सति शब्दार्थलिंगभिन्नं । एवं पूर्वास्यादौ दूरणस्यापि योजनीयं ॥ ७ ॥ इदानीं क्र
मेण शब्दार्थविलक्षिभिन्नमाह ॥ अनुकूलेति ॥ अनु । कूल विधायि दैवतः अनुकूलकारि दैवतं यस्य स तथो
क्तः । वृंदारका दैवतानि पुंसि वेत्यमरः । अथवा अ नुकूलकारिदेवादिति तस्य लपस्य संते अव्ययं । विन
यी । नयशीलः नृपः कीदृशः स्यात् । न क्षितिसंबोधे ने । प्रश्ना वक्षरणानुज्ञानुनया मंत्रणे न तु इत्यमरः
नु ॥ कुशलवर्द्धितः । कुशलिः निपुणैः अर्थान् मंत्रिभिः वर्द्धितः । कृती कुशल इत्यपीत्यमरः । विरहिणी जानक्या
पि सीता पिवनेनिव संवीकृतः कस्मात् तस्मुदर्षमादायेो ॥ ७ ॥ कुशलवर्द्धितः । कुशाश्च लवश्च तयोः रिद्धितः सम्रद्धित
॥ अन्यदप्याह ॥ कुसुमपिति ॥ नाकवः स्वर्गतियतत् पुष्पं एव प्राप्य भोगिनः भोगवंतः । भोगः सुखस्त्र
दिभृता वादेश्च फणकाययो रित्यमरः । सुखिनः कस्मे स्पृहयंति । स्पृहे रीप्सित इति चतुर्थी । स्पृहां कुर्वंति ॥ ७ ॥ सु
रतरवे । सुराणां तरुः तस्मे कल्पवृक्षाय । सुशिक्षिता कामकलाकुशला । वरांगना उत्तमांगना रतमधिगम्य प्राप्य

नेकत्र कुरुते । अत्र तु शब्दप्रश्नो ॥ सुरतरवे सुरतरज्ञ शब्दोइ इदं तरूर वज्ञ शब्दः स्यां शब्दभेदः । विलक्ष्याच भेदः । ए
कत्र चतुर्थी अपरत्र सप्तमी । एवं पूर्वादिद्दूरणस्यापि यथोचितं योजनीयं ॥ ७ ॥ ॥ इति शब्दार्थविलक्षिभिन्नं ॥ ४२
॥ ॥ इदानीं शब्दार्थवचनभिन्नमाह ॥ काम्बुजदारति । हरिः कृष्णः । अंबुधिमध्यमग्नां समुद्रांतर्लीनां कां उद्धृ
शत्रु हृतवान् ॥ ७ ॥ कुं पृथ्वीं । आगमानां वेदशास्त्राणां निर्मलं शुद्धं श्रवणमाकर्णनं कीदृक् भवति ॥ ७ ॥ दमकरं इंद्रिय
निग्रहकरं । दांतिस्तु दमस्तु दम इत्यमरः ॥ अग्निशिखावलीढं । अग्निशिखाभिः अवलिढं तत् इति तत्त्वनं आमंत्रय ॥
खा संबोधयः ॥ ७ ॥ दविनां दवोस्या स्तीति दवीवि । तस्य संबुद्धिः वनापितहनमपिकः दहति ॥ ७ ॥ दवः दावा
ग्नः दववदावौ वनारण्यवह्नी इत्यमरः । भ्रमरान् कमदयंति मदयुक्तान् दयंति ॥ ७ ॥ कं दमकरंदं बिंदवः कुं
दानां मकरंदा ततयो बिंदवः पृषता पृषंतिविंदुपृषता इत्यमरः ॥ ४२ ॥ अन्यदप्याह ॥ वसतीति । सरोरुह
संततिः कमलपरंपरा । कुत्र वसंति ॥ ७ ॥ के । नु दाक । कवनशिरारुद्संतितिरितिपठंति ॥ तदा उत्तरमेतत् । कमस्त
के । नत्तु भो दिनकृतः सूर्यस्य तिमिरच्छिदः । अंधकारविनाशकाः ॥ क ॥ ७ ॥ किरणो कराः । किरणानां उक्त शः स्पृद्धा
स्यान्निकायः पुंजराशी उत्करः कूटमस्त्रियामित्यमरः । पवनभक्ष्यः सर्पः पन्नगणो सुदंते पवनः भक्षः भक्षितुं
यांगणो ययांतस्यपि । तयोः सर्पभक्षः शत्रुः मयूरस्याहूज कः । सा कं गः दुर्मना विमना अंतर्मनास्या उत्कउन्मना इत्य
मरः । जगतः कः प्रियः ॥ ७ ॥ राः धनी इत्येकत्र उक्त रशब्दः अपरत्र रवाशब्दः इति शब्दभेदसत्यर्थाभेदः ॥ राः

त्यत्रैकवचनं तु क्वचिदित्यत्र बहुवचनं। एवं च सति। शब्दार्थवचनभिन्नं॥ ४१॥ ॥इदानीं शब्दार्थविभक्तिलिंग॥
भिन्नमाह॥ कीदृग्दृष्टमिति। याम्यदृष्टगतस्य यमसंबंधियाम्यं। तत्र तत्र दृग्दृष्टं वचनत्वाच्च स्यपुंसः दृष्टं कीदृग्
भवति॥ उ॥ द्वाराविद्या इति रावो। विद्यातयस्मिन् तत्। अंतरस्तरणे जलतरणे। जनानां कास्त्राणोरहणे। नानावः। अ
त्र बहुवचनां तायोनोशब्दः। कं गतेतवकथं तु इति प्रश्नविशेषे। तृषा तृषणं ननास्ति। इति उक्तप्रकारेण मु।
क्ताकलापेषु मुक्तासराणेः कलापो भूषणे बर्हे इत्यमरः। ॥ष्टप्रश्ने ज्ञातसति स्नाचरूः। उ किं। वः विना। नु वाताति
नाहाराः न संतीत्यर्थः॥ ४२॥ ॥उदाहरणांतरमाह ॥कवयं इति। कवयः कवीश्वराः कुत्र विषये कीदृ।
शाः वद। कथय। उ। गिरिवाणां। सारसुखाः सारसु खं येषां ते सारसुखाः। सारो बले स्थिरांशे च न्या
य्ये क्लीबवरं त्रिषित्यमरः। अत्र सारशब्दः बलार्थी। वाचकः। कवीनां वचन एव बलमिति स्पष्टं ततः सर्व
त्र किं कठिनं विदितं। उ। गिरिसारं पर्वतसारं। अत्र वार आर्य सारशब्दः। अधुना इदानीं। तव वैरियोषितां। शत्रु
नारीणां हृदि चित्तकाः विद्याया परित्यज्या। तापः संतापः प्रबलः। उ। उखा स्थाली। पिठरः स्थाल्युखा कुंडमित्य
मरः। तृषा सुस्थाली सुतापेना। स्थि। अत्र पानीयादि पाकरादित्यादित्यर्थः। अन्यान्न सर्वत्रास्ति। एकत्र सु॥
खशब्दः अपरत्र तृषाशब्दः इति शब्दभेदस्तत्पर्थभेदः। तृषा इत्यत्र द्वितीयाबहुवचनं सुखइत्यत्र प्रथमाव ८
चनं। एकत्र स्त्रीलिंगता। अन्यत्र पुल्लिंगता। अतः विभक्तिलिंगानां दावपि वर्तिता। एवं च सति शब्दार्थविभक्ति

लिंगभिन्नं॥ ३॥ ४४॥ ॥इदानीं शब्दार्थलिंगवचनभिन्नमाह॥ मेघात्यय इति। मेघात्यये मेघावसाने शरदि। सु
नगा वगाह्य। सुखेन अवगाह्य योग्यं॥ किं भवति। उ। सरः। कासरः। चारणमल्लविटपाः चारणाः नंदिजनविशेषाः।
मल्लाः मुष्टियुद्धकारिणः। विटपाः रूपाजीवाः गणिकाः एताः कावा विडंबयति। तिरस्करोति। उ। जरा। केशाशा।
वस्था। पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा। इत्यमरः। चारणादीनां यौवनावस्थायामेव सकलासो
भाग्यस्फुरणात्। वीर्यस्य चलस्य विभवः। वीर्यं बलप्रभावावित्यमरः। ३ उ वरिः वीर्यं विभावायस्परणे सुदेकः भ
वति॥ उ॥ उदयानंतरणे सूर्यस्य प्रभाभिः रश्मिभिः स्म। रवकस्तु ७ नगाः। हसन्तु खमिव मानाहराः का
॥ उ॥ साराजराजयः। कमलपंक्तयः॥ ३॥ ४५॥ अन्य दृष्याह॥ दृष्टवतीति॥ शिरोरुहः कचाः मधुम
थनं कस्य पृच्छति। किंमिति। नु विस्त्रमो च पललतया॥ चंचलतया कः खलु विदितः प्रसिद्धः खलु वा॥
कालंकारः। शिरोरुहं संबाधानतरं वस्तुमित्यर्थः॥ ३॥ ॥द्वाकशा वनौकाः वानरः मर्कटो वानरः की
शो वनौका इत्यमरः। वनमाकः स्थानं यस्य स तथोक्तः। मधुमथनस्यात् शिरोरुहं दृष्टवती। प्रश्नं करोति।
किमिति नखो। गविलदके॥ स्वार्थे शुपशुवाप्यइ। दिमित्र शशिरुजलं। लक्ष्यदृष्टा। स्त्रियां पुंसि गौरित्यम
रः। यानतया वाहनतया। काः। गदिता। उक्ताः। उ। द्वाकशावनौकाः। नावः इदं कतवनौ कासां तत्र शब्द
ः अन्यत्र नौका शब्दः इति शब्दभेदस्तत्पर्थभेदः। एकत्र स्त्रीलिंगता। अन्यत्र पुल्लिंगता। एकत्रैकव॥

वचनं॥ अन्यत्र बहुवचनं॥ अतश्च लिंगशब्दार्थविभक्तिवचनभिन्नमाद्यानं भवतीति मलयस्य मलयगिरेः॥ कीदृशैः॥
कीदृशी न भवति॥ उ॥ विपन्नगा॥ विगताः पन्नगाः सर्पा यस्याः भूमेः सकाशात् सा तथोक्ता॥ इह जगति॥ कश्चं सानंकः॥ न बिभ
र्ति न दधाति॥ उ॥ ना॥ भ्रमान्॥ श्रीः लक्ष्मीः॥ कं गता प्राप्ता॥ उ॥ अंकस्थां भवदरिनिवहे - भव छत्रसहादश॥ का नित्यम
भिवतीत॥ उ॥ विपत्॥ आपत्॥ बलमथनेन इंद्रेण॥ कस्यां विपत् आपत् व्यधायि अकारि॥ उ॥ नगानां॥ एकत्र अः शब्दः
अपरत्र नगशब्दः भेदे सत्यर्थभेदः॥ एकत्र द्वितीया अन्यत्र षष्ठी॥ तथा एकत्र एकवचनं। इतरत्र बहुवचनं॥ अतश्च वि
भक्तिवचनभेदावपि व्याहृत॥ ४३॥ ॥अन्यदप्याह॥ स॥ मयमित्यादि॥ इह जगति॥ निशीथसमयं कं वदंति॥
उ॥ अरविंदरविरहितं। अर्द्धरात्रं निशीथो॥ हा वितमः॥ रः॥ वारिवाहवृंदं॥ मेघसमूहः॥ कान् गमयति॥ प्रां
तिं प्रापयति। वद कथय॥ उ॥ दवान्॥ जगतां वनस्तु॥ विरहिषु अतिमात्रं गाढं सदा नित्यं कीदृग्यं तडागः॥
मुदं हर्षं वितरति तनोति॥ उ॥ अरविंदवान्॥ महोत्पलवान्॥ अरविंदं महोत्पलमित्यमरः॥ एकत्र दवशब्दः अन्यत्र अरविं
दवच्छब्दः इति शब्दभेदे सत्यर्थभेदः॥ एकत्र द्वितीया अन्यत्र प्रथमा॥ एकत्र बहुवचनमितरत्रैकवचनं॥ अतः विभक्ति
वचनभेदावपि व्याहृत॥ एवं च सति शब्दार्थविभक्तिवचनभिन्नं॥ ४४॥ ॥इदानीं शब्दार्थविभक्तिलिंगवचनभिन्नमाह॥
कीदृक्षमिति॥ समिति॥ युद्धे कीदृक् बलं सैन्यं करटशत्रुरिंद्रो निंदंति॥ उ॥ अभिन्न विद्यते भीर्यस्मिन् तत् विभ्रोः मनसि
का सदा मुदं हर्षं तनोति॥ उ॥ मा लक्ष्मीः॥ शरधिषु मुखं तूणीरमुखं तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः

५

रः॥ तुच्छं सत् रिक्तं सत् किं निगद्यते। कथ्यते॥ उ॥ अनिषु॥ न विद्यंते इषवो बाणाः यस्मिन् तत्॥ केषु अयमानएव धिक्का
रएवयं च बहुमतं। मरणं संमतं॥ उ॥ अभिमानिषु अहंकारिषु॥ ४५॥ ॥अन्यदप्याह॥ घनसमय वर्षाकाल कीदृक् शि॥
खिषु कीदृशेषु मल्लारषु नृत्यं अंगविक्षेपमातंस्यात्॥ उ॥ समुन्नमुद॥ मुदा हर्षेण सह वर्तंत इति समुदः तेषु॥ घना तू म
घात् किं पतति॥ उ॥ कं॥ उदकं॥ प्रावृषि वर्षासु कस्य गमनं न॥ उ॥ अनसः॥ शकटस्य॥ क्लीबेनः शाकटोस्त्री स्यादित्यमर
ः हंसाः मानसमभि॥ मनः सरोवरं प्रति कीदृशा भवंति॥ उ॥ समुत्सुकमनसः समुत्सुकं मनो येषां ते तथोक्ताः॥ इहैक
त्र अनस् शब्दः अपरत्र मनस् शब्द इति शब्दभेदे स॥ त्यर्थभेदः॥ एकत्र षष्ठी। अन्यत्र प्रथमा॥ एकत्र नपुं
सकलिंगता इतरत्र सति बहुव्रीहौ पुल्लिंगता॥ एक त्रैकवचनमन्यत्र बहुवचनं। अतश्च विभक्तिलिंग॥
वचनभेदावपि व्याहृत। एवं सति शब्दार्थविभक्तिलिंग वचनभिन्नं॥ एवं सप्रपंचं प्रभिन्नकं निरूपितं॥ ४६
॥ ॥इदानीमर्थमात्रिकभिन्नं प्रभिन्नकमभिधातुं तल्लक्षणमाह॥ अर्थमात्रिक इति॥ कवनस्तु कुमार पडिमः अ
ल्पबुद्धयः अर्थमात्रिकभेदेन। अर्थमात्रमिव वस्तु व्याजदः। तत भिन्नं बध्नंति रचयंति। तच्च भिन्नं विदग्धैः पंडितै
नादृतं। कुतः। इतरविश्रामावात्। यथा स्पष्टी भवति तथा वक्ष्ये॥ ४७॥ ५१॥ ॥इदानीं तदुदाहरति॥ आनंदयती
ति॥ भूतले सज्जनानवसमुत्सुकानव अस्यार्थकः आनंदयति॥ आनंदयुक्तान् करोति॥ उ॥ मित्रोदयः॥ इष्टस्य
सुहृदयः॥ अथ मित्रं स्तरविसहृतद्वित्यमरः। पद्मानि कमलानि कः प्रबोधयति विकासयति॥ तमांसि चकः निदं॥

ति॥उ॥ मित्रोदयः द्युमणिस्तरणिर्मित्र इत्यमरः॥ ५१॥ ॥छ॥ अन्यदप्याह॥ अटवीति॥ हे प्रिया प्रायः प्रायेण॥
कीदृशी अटवी। अरण्यं। अटव्यरण्यं विपिनमित्यमरः। दुर्गमा। दुःखेन गम्यत इति दुर्गमा विषमा भवति॥ उ॥ मद
नवती॥ती॥ मदनद्रुमसहिता॥ मदनद्रुमो दिकंटका भवंति॥ शल्यश्च मदन इत्यमरः। प्रियस्य कीदृशी कांतासुरत
ता। सवं। सुरते उत्सवं आनंदं ननोति॥ उ॥ मदनवती। कामवती। यदा कामवती भवति तदा कामकला। अनल्पमे
पि रते प्रकटयति। कामस्याधीनत्वात् ताः कलाश्चानुभवतः प्रियस्यानंदः। इदार्थमात्र भेदेन प्रभिन्नकमुक्तं॥छ॥
५२॥ इदानीं शब्दादिभिन्नं प्रभिन्नकमेव प्रतिपा दयितुमाह॥ भिन्नाविति॥ शब्दार्थो चेवरूपं भि॥
न्नौ पृथक् प्रश्नकोविदैः प्रश्नपंडितैः कल्पितौ। ।एतावता एकस्यैव मित्रोदय शब्दस्यानेकार्थत्वात्
।अतः। अर्थभिन्नं प्रभिन्नकमस्तु दरमुक्तं भव॥ ति। विपश्चितः विद्वांसः। यथा सैंधवादि। स्वशब्दस्य
गुणं यथा भवति तथा लिंगादि द्युभेदमाहुः॥ आदिशब्देन वचनविभक्तीग्रहणं। शब्दार्थाभ्यां सति
लिंगादिभेदश्च केन द्वाभ्यां त्रिभिर्वा भिन्नत्वं च तत्तदा सुंदरमित्यर्थः॥छ॥ ५३॥ ॥इति दुर्गेफकृतायां विद
ग्धमुखमंडनस्य टीकायां आद्या जनिष्टद्वंद्वैः क्लिष्टपदाद्भुदवानूपरिछेदः॥छ॥ ॥१॥ इदानीं क्रमप्रा
प्तं द्वामं भेदाच्छेदकमपि ध्वनिलक्षणमाह॥ विशेषणमिति॥ यत्र यस्मिन् प्रश्ने विशेषणं च विधीय
ते। इतरेभ्यः स्वाश्रयं विशिनष्टीति विशेषणं॥ उ॥ न विशेष्यं च विधीयते क्रियते। तं प्रश्नं प्रश्नवि

दः प्रश्नपंडिताः भेद्यभेदकमाहुः॥ स्वाश्रयमितरेभ्यो भिनत्ति पृथक् करोतीति भेदकमिति लक्षयंति विशेषिकाः
तदाश्रयत्वाद्भेद्यत्वं नाम॥ यथा स्पष्टी भवति तथा वक्ष्ये॥ कथयिष्यामि॥ १ तद्यदाहरति॥ कीदृगिति मश्यानां। स्वच्छ
या विदग्धशीलं येषां तत्तथोक्ताः। तेषां कीदृशं कुं किंदितं अत्र कुलं नस्यात्। कीदृगिष्टं॥ उ॥ विमत्सरः॥ विः प॥
क्षी तद्वत् अर्थात् बकादिपक्षिमत्। नगौकोवाजिविकिरविविष्किरपतत्रय इत्यमरः। किंदितं नस्यादिष्टं॥ उ॥ स
रः कासारः। सरसी सर इत्यमरः। इदयद्यपि एकशब्दत्वाभिन्नार्थप्रतिपादकतया वा एकालापकं। किंच। विमत्सर॥ इति
व्यस्ततया विमत्सर इति समस्ततया व्यस्तसमस्तप्र तीतिः तथापि शब्दैकस्मिन्नेव प्रश्ने सर इति विशेष्यं
भेद्यं विमदिति विशेषणं भेदकमिति विशेषलक्ष॥ णाद्भावत्वात् भेद्यभेदकमाहुः॥ परश्चामन्यवाद्य
गुणैः दानशौर्यादिभिः कीदृशः पुमान्। अत्यर्थं स्पर्धां शां तिवलस्वशात्यार्थत्यमरः। मोदत्वेषु दंभजात॥ उ
।विमत्सरः॥ वि। गतमत्सरः॥ मत्सरोन्यशुभद्वेषः इत्यमरः॥ एतच्चित्रांतरं॥ एवं सर्वत्रापि ज्ञातव्यं॥ छ॥ ॥२॥ अ
न्यदप्याह॥ अगस्त्येनेति॥ अगस्त्येन मुनिना। पयोराशेः समुद्रस्य किं कियत्परिमाणं पीतं॥ किं कियत्परिमा
णं न किंचित्त्यक्तं च॥ उ॥ सकलं संपूर्णं॥ उ॥ कं पानीयं॥ भोवीरसुभटसमरे युद्धे त्वया वैरिकुलं। वैरिणां श
त्रूणां कुलं वृंदं कीदृशं कृतं॥ उ॥ सकलंकं॥ कलिकसहितं। कलंकं कोपराधयोरित्यमरः। इदापि सकल
मिति विशेषणं कमिति विशेष्यं। अन्यच्चित्रांतरं॥ इति भेद्यभेदकजाति॥ ३ क्रमप्राप्तमोनक्लिष्टमुक्तं तल्लक्षण

माह॥ दीर्घवृत्तेनेति। दीर्घवृत्तेन इंद्रवज्रादिवृत्तेन ष्टं स तूयकृत्तरे क्रियद्दूरं भवति। गणना विधेयं च उथ
गयं भवतियावत्। तत् तंजस्वीतिविख्यातं प्रसिद्धं॥ समासबहुत्वे तंजः। गुणविशेषो तंजः तदस्यास्तीति। अस्मा
यामेधास्रजो विनिरिति मंत्वर्थीयो विनिः। तत् तंजस्वी स्त्रि। केचनकुर्वितमितिकथयंति॥ ॥ ॥ सा नंदुदाहरति॥
कामिन्या इति॥ कामिन्याः कामवत्याः कीदृक् कुसुमानुबद्धो भवति। कीदृश्याः तस्याः। स्तनभारमंथरगते। स्तन
योर्भरिः। तेनमंथरागतिर्यस्याः सा तस्याः। मंदगामी च मंथरः। पुनः कीदृश्याः। लीलाचलचक्षुषः। चलया। चल
तीचं चले चक्षुषी नेत्रे यस्याः। पुनः कीदृश्याः। कंद॰ पिंकविलासनित्यवसतेः। कंदर्पस्य मदनस्य एका
मुख्या। एकमुख्या। न्यकेवला इत्यमरः। विलासा॥ नांश्रृंगारभावचेष्टाविशेषणां नित्या चासो वसतिः।
श्च तस्याः तद्दरं॥ समरतः। समं रतं विद्यात यस्मिन् यस्येतिवा। यथा चक्रकोके। हरिणी शशायो यो
गे वडवा वृषयोस्तथा। हस्तिनीहृदयोश्चिव मतं समरतं त्रयमिति भवधरतमुच्यत इत्यतः विषमरतत्रयं विहा
य बहुतरत्रयं विहाय च उत्तममेव समरतत्रयं यो जानाति स एव प्राणेश्वरः स्यादित्यर्थः॥ तथा नेतवअरयः शात्र
वः हेलाकृष्टकृपाणपाटितगजानीकाः। हेलया आकृष्टाः उद्धृताः यकृपाणाः खड्गाः कौक्षेयको मंडला
ग्रः करवालः कृपाणवदित्यमरः। तैः पाटितं हत्वा स्तालयातितं गजानीकं गजचक्रं येस्ते इति अरिविशे
षणं गजानीकादितियागे तु यस्मिन्निति समरविशेषणं। वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रिया। मित्य

११

मरः। जीवार्थिनः संतः जीवं अर्थयांत इत्येवंशीलाः। अर्थयाञ्चायां। तथा कृतः। कस्मात् च निर्यांतिनिर्गच्छंति क॥
थं रत्ता स्त्रे त्रासायासविशृंखलं कं भकुहराः त्रासेन भयेन च उद्वेशादरस्त्रासइत्यमरः। तेनउत्पन्नः। यायमायासः तस्मा
द्धा उत्पन्नः प्रयासः। तेन विशृंखलं बाधं शोभाहीनं कं भस्य कुहरं बिलं येषां ते तथोक्ताः। इह कुहरशब्दः छिद्रवाची। नागलो॥
को थकुहरं सुषिरं विवरं बिलमित्यमरः॥ ॥ समरतः॥ युद्धातू॥ य॥ ॥ ॥ अन्यदप्याह॥ दित्याराति रिति॥ आसोदित्या
रातिः। कृष्णः। वराहवपुषा वराहावतारेण अंबुधेः समुद्रात् कांतः उद्धारा। उद्धृतवान्॥ ॥ कं। पृथ्वीं। गोत्रा कुः पृथिवी

र घु १

पृथ्वीत्यमरः। रूपं सौंदर्यका विनिर्द्वतिना शयंति॥ ॥ जरा। वृद्धावस्था। पलितं जरसा शौक्ल्यं केशादौ विस्र
साजरा इत्यमरः। मधुवधूविधवयदीतत्रगुरु॥ कः॥ ॥ अः कृष्णः। स्वछंदं स्वछया विध्वस विध्वने विध्वसबलार
ण्यानवसल्लकीकवलनैः। नवा चासौ सल्लकी च अगं॥ धिनी गजप्रिया उत्सुवहा सुरभी रसा महेरणा कुंडु
रुकी सल्लकी ह्लादिनी ति चेत्यमरः॥ तया च विद्ध्वणः। सल्लकी त्यजति किं मतंगज इति॥ तस्याः कवलनानि तैः। अथ च पं
पासरो मज्जनैः। पंपाख्यं सरः। तत्र मज्जनैः स्नानैः। अभिमतक्रीडाभिरामस्थिति। अभिमतया इष्टया क्रीडया अभिरा
मा मनोहरा स्थितिर्यस्मिन्निति कर्मणी क्रियाविशेषणं॥ अथवा॥ अभिमतक्रीडाविहारस्थिताः संतः। अभिमतया॥
संमतया क्रीडया योयं विहारः विहरणं तत्र स्थिताः संतः क निवसंति। वसतिं कुर्वंति॥ ॥ कुंजराः हस्तिनः॥ ॥ ॥
इत्योजस्विजतिः॥ ॥ ॥ इदानीं क्रमप्राप्तं सालंकारमभिधस्तं लक्षणमाह॥ उपमानेति॥ उपमानाद्यलंकारः॥

उपमीयते येन तदुपमानं तत्तु॥ आदिर्यस्य सः स चासौ अलंकारश्च उपमानाद्यलंकारः। चकुःथमचकुप्रकारेण उक्तः
परिक्लिष्टिः ते। न सार्द्धं उपमानाद्यलंकारेण सह॥ सार्द्धं तु साकं सत्रा समं सहेत्यमरः॥ यत्र कथ्यते अलंकारेण साकं प
श्रः क्रियत इत्यर्थः॥ तत्सालंकारमुच्यते॥ ८॥ ॥ उन्नादवो दाहरति॥ कल्याणवागिति॥ लोकांतप्रियअत्रजगनि त्वमिव क
ल्याणवाक्। कल्याणं मंगलं वक्तीति कल्याणवाक्। कल्याणं मंगलं शुभमित्यमरः। किमिदं॥ उ॥ शं॥ सुखं॥ त्वमिव सकृपतेः। न्या
यवर्त्तिनः राज्ञः। परितोषकारी। हर्षविधायी। कः। उ॥ करः। भागधेयः करो बलिरित्यमरः। तथा त्वमिव पालितसर्वभूतः। कः।
उ॥ शंकरः। शंकरोपि पालितसर्वभूतो भवति। पालिताः सर्वभूताः देवयोनयो येन सः। भूतोमी देवयोनय इत्यम
रः। एवंविधः शंकरो भवति। त्वमपि पालितसर्वभूतः। पा॥ लितानि सर्वभूतानि येन सः। यद्वेक्ष्मादौ हव भूतं प्राण्य
तीतसमेत्रीषु त्रिष्वित्यमरः। तथा अतिमात्रं अत्यर्थं अतिमा॥ त्राफाढनिर्भरमित्यमरः। भूत्या आश्रितः ऐश्वर्येणाश्रि
तः। भूतिर्भस्मनि संपदीत्यमरः। यद्वा भस्मना आश्रितः व्याप्तः। तथा सर्वदा वृषगतिः सर्वदा अनवरतं वृषगतिः वृषेण धर्मे
ण तस्मिन्वा गतिः गमनं यस्य सः। श्रेयसी सुकृतं वृष इत्यमारः। एवंविधस्त्वं। यद्वा वाहनेन वृषभेण गतिर्गमनं यस्य सः॥
सुकृते वृषभे वृष इत्यमरः। त्वमिव एवं गुणविशिष्टः कः॥ उ॥ शंकरः॥ महेशः। उपमालंकारद्योतका इववदादिशब्दाः। तन्
तु इव यद्वात्। स्यात्र सर्वत्र प्रश्नेश्वरेषु पमानता। तादृक्षिणिष्प्यात्र सालंकारत्वं॥ ८॥ ॥९॥ अन्यदप्याह॥ सूर्यस्येति॥ तिमिरकुंजर
वृंदसिंही। तिमिराण्येव कुंजराः। तमिस्रं तिमिरं तम इत्यमरः। तेषां वृंदसमूहः स्त्रियां तु संहतिर्वृंदमित्यमरः॥ तस्य सिंही॥

सूर्यस्य का। कोर्थः। तिमिरकुंजरवृंदस्य सिंही सिंहीव सिंहस्त्रीव का। इदत्र इदत्वाद्वा उपमा प्रकटिता॥ स्ने वां त
र्दिता चेत्तदा रूपकालंकारः। तथा च दंडी। उपमैव तिरोभूतभेदा रूपकमिष्यत इति। उत्तरमेतत्। भाः। प्रत्यपि
भवति। दीप्तिः। सुप्रभा उ रुग्रुचि त्विड्भाभाः छविद्युतिदीप्तय इत्यमरः॥ एवमेवंविधे सर्वत्रापि द्रष्टव्यं। सत्यस्य अ
नन्यथारूपस्य। सुकृतवारिधिचंद्रलेखा। का। सुकृतान्येव वारिधिः तस्य चंद्रलेखा का। श्रेयसी सुकृतं वृष इत्यम
रः॥ उ॥ गीः। वाणी गीर्वाग्वाणी सरस्वतीत्यमरः। यथा काचिच्चंद्रकला आह्लादकतया समुद्रस्य वृद्धिप्रदा भवति।
तथा काचित्सत्यवाक् सुकृतस्य पुण्यस्य वृद्धिप्रदा॥ भवतीत्यर्थः॥ पार्थश्च अर्जुनः पृथायाः अपत्यं पार्थः।
अरिदावकृशानः। अरयः शत्रव एव दावा वनं त॥ स्य कृशानुः वह्निः। दवदावौ वनारण्यवह्नी इत्य
मरः। कीदृग् कृष्णभूत्। अभवत्॥ उ॥ रथी॥ रथोवि॥ द्यते यस्य। सरथी। रथी सन् सर्वानपि जितवान् इत्य
र्थः। हरस्य महेशस्य शिरसि मस्तके मालती कुसुमदाम। जाती पुष्पमाला। सुमना मालती जातिर्जातिरित्यमरः॥
का॥ उ॥ भागीरथी॥ गंगा। अत्र रूपकालंकारः। इति सालंकारजातिः॥ ८॥ ॥१०॥ इदानीं क्रमप्राप्तं सत्कौतुकमनि
धाचं तल्लक्षणमाह॥ लघुवृत्तेनेति॥ लघुवृत्तान्। अनुष्टुबादिवृत्तेन दृष्टं सत्तूयत् उत्तरं प्रभूतताक्षरं भवति। प्र
भूतं प्रचुरं प्राज्यमदभ्रं बहुलं बह्वित्यमरः। तद्विदः। शास्त्रविदः। तदिदं सत्कौतुकमिति इत्थं ते। अंगीकुर्वंति॥ यथा
भिवद्यो॥ ८॥ १०॥ तदुदाहरति॥ ॥ कस्थिरा इति। स्थिराः निश्चलाः। के के॥ उ॥ अगाः॥ नगच्छंतीत्यगाः। पर्वताः।

स्त्रीणां प्रियांके॥उ॥धवाः।धवः प्रियः पतिर्भर्तेत्यमरः।अप्रियः कः॥उ॥रिपुः॥नक्तं रात्रिं आह्वय॥उ॥देरजनि॥
दिरात्रिं नृत्यस्थः रम्या मनोहरा कीदृशी भवति॥उ॥ततरंगा॥ततः विस्तृतः रंगः नृत्यगीतवाद्यप्रदेशः यस्यां सा।अनाग
म॥मघागमेन नदी कीदृक् भवति॥उ॥अगाधवारिपूरजनिततरंगा।अगाधश्चासौ वारिपूरश्च तेन जनितास्तरंगाः य
स्यां सा।अगाधमतलस्पर्शमित्यमरः॥८॥११॥ ॥अन्यदप्याह॥काहृतेति।विष्णुना का हृता॥उ॥कुमुत्।कुः पृथ्वी तस्या
मुत् दर्षः॥यत्नितां स्त्रीणां कीदृक् कः प्रशस्यते।श्लाघ्यते।अवनूवानुं।अवरक्षणे।अस्मात् भावे क्विप् अवनमिति तद्विद्यते
यस्येति मंत्वर्थीयोगमतुप्।धवः पतिः यद्यपि अवनवान् धव इत्यत्र विशेषणविशेष्यविधानात् च मेदकप्र
तीतिं तथापि लघुत्वात् न प्रश्नः प्रवृत्तोत्तरमिति विशेषः। लक्षणाघातचातुः सा कौतुकमेव।कीदृशः स्वामी॥अ
नस्स्यः॥उ॥अदयः।दयारहितः।कः निशातमः।रजनी॥ तिमिरं निरंतिः॥उ॥कुमुदवनबांधवोदयः।कुमुदानां
वनं तस्य बांधवः चंद्रः तस्य उदयः॥१२ इति सा कौतुकजातिः॥इदानीं क्रमप्राप्तं प्रश्नोत्तरमभिधत्ते लक्षणमाह॥प्रश्नवर्ण
स्तते रिति।प्रश्नवर्णैः तैः प्रश्नाक्षरश्रवणस्य।श्रुतिः स्त्री श्रवणं श्रय इत्यमरः॥तुल्यं समानं वरं श्रेष्ठं यत्र उत्तरं स्यात्॥त
ज्ज्ञाः प्रश्नोत्तरविदः।तत् प्रश्नोत्तरसममाहुः॥यथा वाद्यते तथा श्रूयतां॥१३ उदाहरति॥कंदर्पमिति।मदजनकं॥माद
महंता तज्जनकं दर्पकं प्राहुः॥उ॥कंदर्पं॥मदनं॥इदं जगति श्रेष्ठतमा अतिशयेन श्रेष्ठा श्रेष्ठतमा।काचघटी॥ग १२
दिता उक्ता॥उ॥काचघटी॥कांचस्य घटी।हरः काचोप्य चपल इत्यमरः॥इत्यादि प्रश्नाः इति एवं क्रिया प्रश्नो आदी॥

यस्य सः इत्यादिः स चासौ प्रश्नश्च तस्मिन् यत् उत्तरं स्यात् विचारक्रमं तत् उत्तरं आशुशीघ्रं विचिंत्य विचार्य बुद्धिक
थय॥दशरूपं समंजसं॥मुक्तमो पथिकं लभ्यमित्यमरः॥१४॥ ॥अन्यदप्याह॥पथिकइति॥पथि मार्गे अयनं वर्त्म मार्गाध्व
पंथान इत्यमरः॥कष्टं यथा भवति तथा कस्तिष्ठति उत्तरं पथि एव॥पथिकः।अध्वगः॥तत्तरत्कः।कुतारत्नयेन सः।कुतरत्कः
तस्याः कुतरत्कः स्याविनौ कायां कस्त्रिवर्तते॥उ॥नाविकः।कर्णधारस्तु नाविक इत्यमरः॥इत्यादि प्रश्नेषु उत्तरं तदा प्रश्नोत्तरसम
माहुः॥इति प्रश्नोत्तरसमजातिः॥१५॥ ॥इदानीं क्रमप्राप्तं पृष्टप्रश्नमभिधातुं तल्लक्षणमाह॥यस्मिन्निति।यस्मिन् वाक्ये उत्तर
मुच्चार्य उत्तरस्य उच्चारणं कृत्वा तस्य च उत्तरस्य प्रश्नः पृ च्छ्यते।अस्योत्तरस्य कः प्रश्न इति।तत् प्रश्नोत्तरविदः प्रश्नस्य
यस्य कस्यचित् उत्तरं तद्विदः पृष्टप्रश्नमिति इत्याहुः॥ ख्यातिवद्य॥१६॥तदुदाहरति॥लक्षणेति।यत्र लक्षणा इत्यु
त्तरं तत्र प्रश्नः।कीदृशाः स्यात्।उच्यते।सा रसहिता का।सा। रसस्य पद्मिणः हिता प्रिया का॥उ॥लक्ष्मणा॥सारसस्य स्त्री।
लक्षणेत्यमरः॥श्रीफेकता॥द्विरदवृंदाय गजसमुदाय।कचित्तु द्विरदवृंदानामिति पठंति।कीदृशी वनाली हिता।उत्तरं कास
रसहिता॥सरसीसंयुता।कासारः सरसी सर इत्यमरः॥१७॥८॥ ॥अन्यदप्याह॥चादयेति॥यत्र चादय इति उत्तरं स्यात् तत्र
अत्र प्रश्नः।कीदृशो भवति उच्यते।के निपाताः।निपाताः।निपाताः के इति प्रश्नः।उत्तरं॥चादय इति पाणिनिस्मरणात्॥नौका यः
नौचः।वादकेनोपायाः।वादने चालने तस्य उपायाः साधनानि।के स्युः।तावत्सुः।अरित्रं नौकं कथय॥उ॥तु निपाताः।अरित्राणि॥
अरित्रं केनिपातक इत्यमरः।पृष्टास्योत्तरस्य प्रश्नवधनात् उत्तरो भ्रावा प्रश्नो हा।अतः पृष्टप्रश्नः॥८॥इति पृष्टप्र

श्रजातिं॥ ७॥ १८॥ ॥इदानीं क्रमप्राप्तं नग्नोत्तरमभिधत्ते तल्लक्षणमाह॥ कथयेति॥ अमुकं [illegible] कथय इत्या
दिकाकुमात्रेण संख्याविशेषवर्तमानस्य यत्र प्रश्नवचनानन्तरं प्रभवेत्॥ ततं नग्नोत्तरमिति कथयति॥ अत्र वर्हमा
नस्य पदस्य अनध्यवहारः का प्रत्ययश्चिंत्यः भिन्नकर्तृकत्वात् समानकर्तृके क्त्वाप्रत्ययः॥ समानकर्तृकयो
पूर्वकाल इति पाणिनिस्मरणात्॥ काकुः॥ स्वरविशेषः काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्य
मरः॥ तन्मात्रेण वा गोपितं काकुमात्रेण वक्रोक्तिरिति कचन॥ १९॥ तदाहरति॥ ॥नवतडागवति॥ नवतडव अतिस्व
च्छं अतिनिर्मलं अगाधं तलस्पर्शी। अगाधमतलस्य॥ र्शमित्यमरः॥ अतिशिशिरं॥ अतिसुखीमं सुषीमः
शिशिरो जड इत्यमरः। कस्य अभ्यन्तरं। अंतरालं अ भ्यन्तरं त्वंतरालमित्यमरः॥ ७॥ कस्या उदकस्येव का
व्यामृतरसमग्नः काव्यामव अमृतं तत्र रसः शृंगा॥ रादि विषये वीर्यगुणरागद्रवे रस इत्यमरः॥ अत्र
द्रवार्थे रसशब्दः॥ तत्र मग्नः॥ त्वमिव सदा सरसः॥ रसाढ्यः कः कथय॥ ७॥ सरसः॥ रसेन सह वर्त्तत इति सरसः॥
प्रश्नोत्तरसमस्तजातिग्नोत्तरस्य चालदाता वा तु याथार्थ्यं न अनुपन्यासः उक्त इति चेत्॥ न॥ प्रश्नोत्तरसमप्रश्न
दर्पद्धतिपदद्वयं॥ तज्ञात्तकं दर्यमित्येवं पदं॥ इदं तु प्रश्नोत्तरस्य एकमेव पदमिति विशेषः॥ २०॥ ७॥ अन्यदप्या
ह॥ वीरा श्री॥ सरुषि सति सक्रोधे सति आह्लादकारणं का [illegible] वीराणां वीरः॥ स विद्यते यस्य इत्यर्थे अर्श आ॥
दित्वात्॥ अच्॥ [illegible] नियतं हृदयशायिनी मानानिवासिनी का भवति॥ ७॥ काके॥ कास्यादपि॥ [illegible]॥

१५

शिखा पिचेति दिमी॥ प्रस्थितजलदे गतजलदे। नभसि आकाशे सति॥ नभोंतरिक्षं गगनमित्यमरः॥ का राजति
॥ शोभते॥ वद कथय॥ ७॥ तारा नक्षत्रं नक्षत्रमृक्षं भं तारेत्यमरः॥ एतच्च उत्तरं काकुमात्रेण वर्णय। काकुमात्रे
ण चागोपितं अतस्थमग्नोत्तरं॥ इति नग्नोत्तरजातिः॥ ७॥ २१॥ इदानीं क्रमप्राप्तं आद्युत्तरं मध्योत्तरं अंत्योत्तरं वा
भिधत्सुमाह त्रिपद्येन तल्लक्षणमाह॥ यत्पृष्टमिति॥ पृष्टं यत् प्रश्नवाक्ये प्रश्नपाद्य आदिमध्यांतसंस्थितं स्यात्॥ आ
दिसंस्थितं मध्यसंस्थितं अंतसंस्थितं स्यात् तावता त्रिधा प्रोक्तं॥ आदिमध्यांतभावेन त्रिप्रकारमुक्तं तदुत्तरं॥ आदि
मध्यांतपूर्वकं॥ आदिपूर्वकं मध्यपूर्वकं अंत्यपूर्वं कं भवतीत्यर्थः॥ २२॥ इदानीं क्रमादुदाहरति॥ ७॥ ॥भ्र
मरहित इति॥ विकसितः पुष्पितः पद्मः कीदृशो भवति । तरां अतिशायेन कीदृशा शोभती इत्यर्थः॥ ७॥ भ्रमरहितः॥ भ्र
मराणां हितः। निजमकरंदसंदोहदानात्॥ पुविजा गति॥ लोकः प्रायः प्रायेण ज्योतिषिकः॥ कालज्ञः॥ कीदृशः॥
[illegible] अन्यमन्यात॥ ७॥ भ्रमरहितः भ्रमात् विपरीतज्ञानात् नरहितः [illegible] निर्जीवस्य भ्रमो भ्रमादित्यमरः॥ ७॥ २३॥ अन्यदप्याह॥
प्रभवइति॥ अतिसुभगशृंगधरः॥ अत्यंतसुभगानि च तानि शृंगाणि च तेषां धरः॥ धरतीति॥ [illegible] कूटोस्त्री शिखरं शृंगमित्य
मरः॥ नगपतिः॥ नगानां पर्वतानां पतिः स्वामी। गंगायाः कः भवति॥ ७॥ प्रभवः॥ जन्माद्धेतुः॥ हिमाचलादागतत्वात्॥ स्याज्जन्म
हेतुः प्रभव इत्यमरः॥ [illegible] अत्यंतमत्यर्थं वा अर्थरतेः [illegible] प्रयो
जननिष्टेत्यमरः॥ [illegible]॥ ७॥ प्रभवः॥ स्वामिनः॥ [illegible] इदं पद्यादावेव प्रश्नद्वयस्य [illegible]॥

त॥ आद्युत्तरता॥ इत्याद्युत्तरजातिः॥ ॥२४ इदानीं मध्योत्तरमुदाहरति॥ अयमिति॥ अयं हिमरश्मिः चंद्रः वनिता
वदनस्य स्त्रीमुखस्य कीदृशः सन् उदितः॥ ॥ सदृशः॥ समानः॥ सन्। चंद्रेणायो मिन्मुखं तुल्यमिति सूच्यते॥ नी
लादिकोपलेन॥ नीलं कुसुमादिर्यस्य तत्। नीलादिकं कुसुमे नीला सितश्यामेत्यमरः॥ तस्य उपलं तनुपल्लवि
श्मिङ्गं विदित्यमरः॥ प्रत्यक्षतः प्रत्यक्षप्रमाणेन। कस्य स्फुरति करतलामलकवत्॥ ॥ सदृशः॥ दृश्या सदृक्षवर्तत
इति सदृक्। तस्य सदृशः। चक्षुरिंद्रियसहितस्य॥२५ अन्यदप्याह॥ गैरिकेति॥ गैरिकं मनःशिलादि। गैरिकं
च मनःशिला च ते आदी यस्य तत् वस्तु॥ अत्र मनःशिलाद्याद्र्ग गैरिकं तु विशेषतः इत्यमरः॥ प्राय
ण बाहुल्येन कृतः उत्पद्यते। जायते॥ ॥ नगतः॥ पर्वतात्। यः पुरुषः स्थानात्। न चलति। स्खलति॥
वाक्यालंकारे। स पुमान् कीदृक्षः॥ उक्तः॥ कथितः॥ ॥ नगतः॥ न विद्यते नगतं गमनं यस्य सः॥ इदम
ध्ये नगत इत्यनेन प्रश्नद्वयस्याप्युत्तरमिति मध्योत्तरता॥ इति मध्योत्तरजातिः॥ ॥ इदानीमन्त्योत्तरमुदाहरति॥
२६ कस्मिन्वसंतीति॥ मीनगणाः॥ मत्स्यसमूहाः। कस्मिन् वसंति। कुत्र स्थितिं कुर्वंति। वद कथय॥ ॥ वारि। वारि
णि। आपः स्त्री भूम्नि वार्वारी त्यमरः॥ किं वा पदं विकल्पं वदति॥ ॥ वा। उपमायां विकल्पे वा इत्यमरः॥ विवस्वान्
सूर्यः किं करोति॥ ॥ अहः दिनं। घस्रो दिनाहनी वा तु इत्यमरः॥ विद्युल्लतावलयैर्विद्योतते यस्य सः विद्युल्लता॥ वि
द्वान्। विद्युदेव लता विद्युल्लता। विद्युल्लतेव वलयः कटकं। कटकं वलयोऽस्त्रियामित्यमरः॥ विद्युल्लतावलया विद्यो

तेयस्य सः विद्युल्लतावलयवान्। पथिकांगनानां पांथस्त्रीणां। कः उद्वेजको भवति॥ ॥ उद्वेगकारी भ
वति॥ ॥ वारिवाहः मेघः॥ अभ्रं मेघो वारिवाह इत्यमरः॥ ॥२७ अन्यदप्याह॥ शाब्द इति॥ प्रश्नगत इति वर्णविपर्यया
त्मकः शाब्दः। प्रचुराभिधायी। प्रचुरं प्राज्यमभिधत्ते इत्येवंशीलः प्रभूतं प्रचुरं प्राज्यमित्यमरः॥ कीदृक् भवेत्। यो शाब्दवि
दः शास्त्रवित् शास्त्रविचारः विचिंत्य विचार्य वदत। कथयत॥ ॥ नास्तिकवर्गमध्यः। प्रश्नगत इति शब्दः यदा कवर्गमध्यस्ते नास्ति
गकारमध्ये न न वेत्ताति दा वर्णत्रयात्मकं प्रश्नगतमिति शाब्दमभिमतं। अस्तिनास्तिशाब्दो तिङंतप्रतिरूपकाव्ययौ॥ तन्मु
ख्यं आयतिनियमात्। सुबंतेन समासः। बृहस्पतिमतं लोकायतशास्त्रं बृहस्पतिप्रणीतं॥ विदितो नियोगः॥ विदितः प्र
सिद्धः अनियोगः आग्रहो यस्य सः। अनियोगाग्रहो समावि ति विष्णुपुमान् पुरुषः॥ प्रायः कीदृक् भवति॥ ॥ ना
स्तिकवर्गमध्यः। यावज्जीवं सुखं जीवेन्नास्ति कैमृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥ इत्येवं ना
स्तिकवर्गस्य मध्यः। अथवा। परलोकं नास्तीति मतिर्येषां ते नास्तिकाः। तेषां वर्गः तस्य मध्यः॥ मध्यस्त्रीत्यपरको [illegible]
नास्तिकानां मध्ये वसतीत्यर्थः॥ इति पद्यांतपदद्वयं प्रश्नद्वयस्याप्युत्तरस्य विद्यमानत्वात् अंत्योत्तरता॥ इति अंत्योत्तरजाति
ः॥ ॥ [illegible] इदानीं क्रमप्राप्तं कथितायकं तमभिधत्ते लक्षणमाह॥ पदांतरेति॥ पदांतरादिति संभवेत्। अन्यत्पदं पदां
तरं॥ तस्य संबंधात् संसर्गात् प्रश्नवाक्ये संस्थितं। यत्र प्रश्नवाक्ये न उत्तरमपि न लभ्यते तत् कथितायकं तेषां तत् कथित
स्य त्वा प्रयुक्तं यत्र तत् कथितापद्युतं॥ ॥२८ ॥ तदुदाहरति॥ पृथ्वीति॥ पिनाकी ईश्वरः॥ कीदृक् [illegible] धनप

रिकीर्तितं।उक्तं।कविना इत्येतस्मिन्नेव पादे विछेदो ज्ञातव्यं॥उ॥देको।देपुष्टि।इदं विश्वं जगत् केन मोदितं मोदमानं॥उ
॥इना॥अरुणः।तस्यापत्यं इः कामः।तेन।किंच।इकार उच्यते कामः इत्युक्तं॥३॥प्रायःचाकल्येन केन यशः आप्यते।प्राप्य
ते॥उ॥कविना॥तथा च॥कवीश्वराः संति नयस्य या श्रीमद्दीपात तत्स्य कुतो यशांसीति इदोक्त्या॥२७॥ ॥अन्यदप्या॥
ह॥कस्येति॥मरो।मरुत्प्रमो।समानो मरुधन्वानावित्यमरः॥कस्य दुरधिगमः।दुरधिगतिः दुःखेन प्राप्तिः॥उ॥कस्याया
नीयस्य।कमले।पंकजे।विरचिता वासः।विरचितः आवासो येन स तथोक्तः॥कः॥उ॥क एव।ब्रह्मा।चामुंडा।दुर्गा।कं ज
ध्यति।संतोषं व्रजति॥उ॥कैः।मस्तकैः।तरिपवः।शत्रवः ।कुलः च्युताः पतिताः॥उ॥कुतः।पृथ्वीतः।मारुताव
धस्मि... सिकः कं शिरोंबुना इत्यमरः।कविनाक॥ स्पत्यादिभिः पादैः कथितस्यास्युत्तरस्यां पङ्क्
तिरपलाप इत्युक्तवान्।काकुमात्रेण गोपितात् प्रश्नोत्त राद्विशेषितं कथितापह्नुतं॥इति कथितापह्नुतं॥
जातिः॥२८ ॥इदानीं क्रमप्राप्तं विषमं॥ हृतनाम चाशिक्षक्रम।कनैव पद्येन तयोर्लक्षणमाह।यत्र भंगस्य तो या
त्रा।शार भंगस्य विछेदस्यावैषम्यं विषमता।कोर्थः।वैषम्येणोत्तरं तद्विषमनिगद्यते।उच्यते।किंच।प्रश्नसति
यत्रतु शार हृतनाम स्यात्।यस्य कस्य चित् वृत्तैत्तस्य नामस्यात्।तहृतनामकं॥२९॥क्रमाणादाहरति।कीदृगिति भया
या।कीदृग् वनं न स्यात्।भीतिभीः साध्वसं भयमित्यमरः॥उ॥अहिंस्रं।न विद्यंते हिंस्राः घातकाः यस्मिन् तत् शिरारुधी
नुको हिंस्र इत्यमरः॥दुष्ट जंतुरहितमित्यर्थः।इति पृष्टे सति अहिंस्रमिति यदुत्तरं।तस्य अहिंस्रमित्येवं रूपस्य।

कीदृशस्य उत्तरस्य।ईक्षणजातं नेत्रोदकं।वाच्यं भवेत्॥उ॥अहिमः।न विद्यते हिमः यस्मिन् तत्।अहिम्।तस्य अहि
मुः।हिमवर्जितस्य मध्याक्षर परित्यागे।अस्रं वाच्यं भवेति।दृग्दृष्टी चास्रु नेत्रांबु रोदनं चाश्रमस्त्रमित्यमरः।य
था।अहिंस्रमिति पदं विछेदवैषम्यात् उत्तरान्तरं अहिंस्रं अस्रमिति वारद्वयमुक्तं॥तथा चोत्तरं नया एकचार
मुक्तस्य अहिम इत्येतस्य पदस्य द्वितीयमुत्तरप्रकारमाह॥कं च।अधिशाता।वक्ष्यमाणः कृष्ण इति शेषः॥उ॥अ
हिंशोषं।अधिष्ठाय शेते।स्वपितीत्यर्थः।कुत्र।गवितदाक।अर्णीनीयां पृच्छ्यः।कः॥उ॥अः कृष्णः॥३०॥ अन्यदप्याह
॥प्राय इति॥प्रायः प्रायेण नराः मनुष्याः सर्वत्रका र्यी सकलकार्यी कीदृशाः संतः नष्टु द्वंति।मोदं अज्ञा
नं न व्रजंति॥उ॥सावधानाः।अवधानेन चित्तैक ग्र्येण सह वर्तंत इति सावधाना।अथवा नियुज्यत इ
ति पाठः।ज्ञान्तिः नियुज्यंते आज्ञाप्यंते नराः।की दृशाः॥उ॥सावधनाः।नाधतिचरा... नो वांची।नावमे
व वक्तीत्येवं शील इत्यर्थःएतु॥कीदृशः सन्।नो वाची भवेत्।वदा कथय॥उ॥सावधनो।प्रथमतः॥नाधत्यस्य शब्दस्य
विछेदः कर्तव्यः।कथं॥ना॥धा॥आ॥इति प्रश्न पदस्य विछेदः।सावधाना इत्युत्तरातिक्षयिनः।शब्दस्याय विछेदः
।सो।अधा।अ ना।अः।त्र अ इति विसर्गद्वयं।अतश्च विछिन्नस्य नाधेत्य तस्य विशेषस्य॥विछिन्नाः।सावधाना अयं
शब्दः विशेषणतया वक्ष्यमाण प्रकारेणायाज्ञनीयः।तदा ह।सोऽकारेण सह वर्तत इति सो।तदानंतरं तत्र प्रथमवर्ण
ऽकार सहित कर्तव्यं।तथा च॥नोभवति।किंच।न विद्यते।धा।यत्र सः।अधः।धरहितः।अथ च।अ नान विद्यते आकारा।

यस्मिन्सः। अना॥ तथाच विसर्गमात्रमवशिष्यते। तथाच विसर्गांतः॥ नोरितिशब्दः सिद्धो भवति॥ २४ इति विषमजातिः॥ इ
दानीं वृत्तनाम उदाहरति॥ गताक्लेशाइति॥ मुनयः ऋषीश्वराः स्वस्थाः संतः कुत्र कस्मिन् तपस्यंति तपश्चरंति। कथंभूतास्ते।
गतक्लेशा आयासाः। गतः पंचक्लेशेषु अविद्याऽस्मितारागद्वेषाभिनिवेशेषु आयासः प्रयासो येषां ते तथोक्ताः॥ विमलमन
सः॥ विमलं निर्मलं मनो येषां ते तथोक्ताः। उत्तरं शिखरिणि। शिखराणि विद्यंते यस्य सः तस्मिन् पर्वते। कूटोऽस्त्री शिखरं
शृंगमित्यमरः। सुररिपुरिपोः सुराणां देवानां रिपुः शत्रुः दैत्यः तस्य रिपुः कृष्णः तस्य नारायणस्य दयिता च का॥ उ॥ ई॥
लक्ष्मीः। लक्ष्मीरीकारस्तु च्यत इति एकाक्षरनिघंटौ । अष्टगुरुभिः। अष्टौ गुरवो विद्यंते येषां। तानि तथोक्तैः
ः गुरुरितिवक्रो रेखाविशेषः। किंवा न च लघुयुतैः। न च विद्यंते लघवश्च यैः युतानीति। अत्र लघुरिति मात्रको
ऋजुः रेखाविशेषः। एवंविधैः वर्णैः। स्फुटा ता वर्णंति शब्दांतर इत्यमरः। स्फुटघटितबंधः स्फुटं यथा भवति तथा
था घटितः रचितः बंधः रचनाविशेषः यस्मिन् तत्। वृत्तं कविप्रियैः किं स्यात्। कथयत॥ पद्यस्यैव द्वौ भेदौ
।या द्यं च चतुष्पदी। तत्र पद्यं द्विधा भवति। वृत्तं जातिरिति। तथा च दंडी। पद्यं चतुष्पदा तच्च वृत्तं जातिरिति द्विधेति॥ अत्र
वृत्तं शिखरिणी। जातिस्तु अत्यष्टिः। षड्भिः। सप्तदशवर्णा शिखरिणी लक्षणमेतत्। रसैः रुद्रैः छिन्ना यमनसभला गः
शिखरिणी॥ ॥ऽऽऽऽऽ॥ ॥ऽऽ।।ऽ ॥२५ अन्यदप्युदाह॥ उरसीति॥ मुरभिदो मुरं दैत्यं भिनत्तीति मुरभित् तेन कृष्णे
न उरसि वक्षःस्थले गाढं दृढं। गाढबाढदृढानि च इत्यमरः। क्रियाविशेषणमेतत्। आलिंगिता आश्लिष्टा। का। आस्ते

२१

वर्त्तीति॥ उ॥ मा लक्ष्मीः। इंदिरा लोकमाता मेत्यमरः। नंदने। नंदयतीति नंदनं आह्लादकं तस्मिन्वने। मातलिर्नंदनं
वनमित्यमरः। सरसिजस्य मकरंदः। पुष्परसः तेन आमोदिता दर्षिता। नंदने। का। उ॥ अलिनी। भ्रमरी॥ गिरिसम
लघुवर्णैः। लघूनि च तानि वर्णानि च। अत्र गिरिसंज्ञया अष्टकुलाचलाः तैः समानि लघुवर्णानि। तैः अर्णवाख्या
तसंख्यैः। अर्णवैः सप्तसमुद्रैः आख्याता कथिता संख्या सप्तसंख्या येषु तानि तथोक्तैः। गुरुभिरपि। छंदसां
। षड्विंशति संख्याकानां उक्तादीनां मध्ये अग्र्या श्रेष्ठा वृत्तिः वर्तिना॥ का। उ। मालिनी॥ ननमयययुतेयं मालिनी भो
गिलोकैरिति सुकवाता॥ ॥ ।।। ।।। ऽऽऽ ।ऽऽ ॥ २६॥ इति वृत्तजातिः॥ उ॥ इदानीं नामाप्यतं तथा बलडादि
गोष्ठीति॥विदग्धजनवत्यपि।विचक्षणजनवतीगोष्ठी।गोचनीयागोचयित्वंयोग्या
निंद्याकीदृग्भवेत्॥उ॥कविरहिताआद्यंवर्णद्वयं





विहाय अपरेर्वर्णैः क्रमेणोत्तरं।तरणिरश्मिसूर्यकिरणैसदाकांति।उ॥रविक
रता अंत्यंवर्णद्वयंविहाय अपरेर्वर्णैस्तुक्रमेणो
त्तरं करस्यभावः करतार
वः करतारविकरता।दुर्वारिदर्पदलितामरनाय
कापिदुर्वारः योसोदर्पः तेनदलितः खंडितः अमरनाय
कः इंद्रः यस्यांसादुर्वारदर्पेणदलितामरनाय
कापि।सुरशत्रुवस्तः।दित्यासनासुद्देनकंदेनूकीदृशी।अ
कारि॥अतानि॥उ॥तारकविरहितातारकासुरेणविरहिता अकारि॥५२ अन्यदप्याह॥कीदृगिति।परैः शत्रुभिः
अपहृतः तिरस्कृतः क्षितीशः कीदृग्भवति॥उ॥गतनयः॥आद्यंवर्णंविहाय अपरेर्वर्णैरुत्तरंगतः नयः षाड्गुण्यंयस्मात्



सा।अनुचंवामनः इच्छति॥उ॥देव्यंग॥अंत्यंवर्णत्रयंविहाय आद्याभ्यांवर्णाभ्यामु
त्तरंविगतामोन्नत्याता।अंगंयस्यइदृग्गतिपवित्रंकिंविदितं॥उ॥गव्यं।अंत्यंवा
र्णत्रयंविहाय आद्याभ्यामेववर्णाभ्यामुत्तरं।गोसंबंधिगव्यं।युतादि।यदीयः जनकः पिताविच्छिन्नपाणि

३५

रणः॥विच्छिन्नोपाणीचरणेचरणेयस्यात्मथोक्तः।सपुमान्पुनः परैः अभिहितः कथितः कीदृक्स्यात्॥उ॥व्यं
गतनयः।विगतं अंगंयस्यतस्यतनयइतिषष्टीतत्पुरुषः॥इतिनागपाशजातिः॥७॥इदानींसंस्कृतप्राकृतंसं
स्कृतापभ्रंशंसंस्कृतमागधिकंसंस्कृतपिशाचिकंसंस्कृतलौकिकंइत्येवंपंचप्रकारंदशोदाहरणोपेतंचित्रमभि
धत्तेशुद्धप्राकृतंशुद्धापभ्रंशंशुद्धमागधिकंशुद्धपैशाचिकंशुद्धलौकिकंइत्येवंपंचविधंदशोदाहरणोपेतंसंस्कृत
मप्यभिधत्तेपद्येनैकेनचित्रस्यलक्षणमाह॥ भाषाभिरिति॥संस्कृतप्राकृतादिभिः संस्कृतप्राकृते आदौयासां
भाषाणांताः ताभिर्भाषाभिः यत्चित्रितंस्यात्॥संतः।तत्
चित्रमितिइच्छंतिप्रश्नपद्येसंस्कृतेप्रश्नः किंचप्राकृते
नापिप्रश्नः उत्तरमपितथैवअतिश्चित्रं।एकभाषयाप्रा
कृतादिभाषयायत्भवति।तत्संशुद्धं।पृथक्।जा
तिरितिज्ञायतां॥५४ इदानींक्रमादुदाहरति॥किंनस्या
दिति॥तादृशस्यवर्ण्यमानस्यमहतोपिउत्तरान्नो
समुद्रस्यकीदृशंकिंनस्यात्॥उ॥कं॥उदकं।अलवणं।लवणरहितं।दिणमणिकिरणप्फंसणपडिउद्धं।दिणमणि
किरणस्पर्शनप्रतिबुद्धं॥गोसे।प्रत्यूषेकिंहोइकिंभवति॥उ॥कमलवणं।कमलानांवनमित्यर्थः॥५५ अन्य
दप्याह॥मस्येति।मशहितं अंबुउदकंकीदृक्॥उ॥अविानविद्यंते।वयः बकादिपक्षिणः यत्रतत्।तथा
क्तो।रोगी।प्रच्छति।उ।देसामा।आमेनरोगेणसहवर्त्ततिइति।निशासुरात्रि।षुकिंजाति।उ॥तंमत्तं।नेहत्र
पृष्टंमंतारत्वमरः।अनंगः कामः कः।उ॥इः मदनः इकारउच्चात।कामइत्येकाक्षरनिघंटा।मृगः वदति

ष्टेन॥ देएण। मृग। गोकर्णपृष्ठतेण॥ इत्यमरः। केरिसा। कीदृशा। रविणा। रियेण रवआका शेगमश्श
म्यते॥ ७॥ अविसाम भमिरेण। अविश्राम भ्रमणशीलेन॥ ५६ इति संस्कृत प्राकृतं। इदानीं संस्कृता प
त्रं समुदाहरति। प्राय इति॥ प्रायः दंतप्रहीणाः दंतरहिताः गजाः कीदृशाः। अरिगजान् बिभ्यति। भ
यं प्राप्नुवंति॥ ७॥ सरदान्। दंतसहितान्। रदना दशना दंता रदा इत्यमरः॥ संप्रति राजन्वती पृथ्वी की
दृशी। नृपतिना कीदृशी। नरूपेन राजता॥ ७॥ अवनौ रक्षिता। अवरक्षणे। प्रायः गिरिसरी। प्रायः पृथिवीसरि
कीदृशी भवति। विदवा द्रवा। नीररहिता। जलेन दाक   कथ्यकं धातुः॥ ७॥ अद्रिः सर्प्पः। अरुहं। म
एण मध्यमा। ... चलिता। चलितसति। घणक्षयदिण।   घनात्ययदिने शरदि सरः कासरः। केरिसं की
दृशं। भ दंजतं। ७॥ सरदादवता विदवा हिरं। श।   रद्दवता विदवा हिरं। शारदवता। पितवा ह्य
प्रदेशं॥ ७॥ अन्यदप्याह॥ कुत्तमिति। कृत्तं छिन्नं अंगं कीदृशं भवति॥ ७॥ विस्वं। आमगंधि। विस्रस्या
दामगंधि यत् इत्यमरः। विद्वांसः। पंडिता। दंतभवंकं वदंति। ७॥ तं। तकारं। लभमानां दंता इति रूपावता
र। अतिलघुवाचि। अत्यंतं लघुसूक्ष्मं वस्तु वक्तीति वाचि तत्पदं किं॥ ७॥ अस्स सुअणे। सुजने। सुजन
सुजनं। कस्सि। कीदृशाः। दोषाः भवति। ७॥ विस्संतमस्स। विश्रांतमनाः॥ ५८ इति संस्कृतापभ्रंशा। इदा   २६
नीं संस्कृत पैशाचिकमुदाहरति। किं मिति। किंपदं। सुखमाकृः। ७। शं। सुखं। क शविकार साकं

वा आकृः॥ ७॥ अलकं। कुसुकुंतलं। अलकाश्चूर्णकुंतला इत्यमरः। हारः। कृष्णस्य का दयिता। ७। मा लक्ष्मीं। नि
शिरात्रौ। कस्मिन् कथं। आ ... दीप्तिः। ७। भे। नदते। अलं अत्यर्थं। नीलद्युति। साण। वीरवरुषाणां के हृदि॥
कः रोचात्। ७। शमेलकस्मात् लंभे। समरकर्मारिंभः शुद्धकार्य आरंभः॥ ५९ अन्यदप्याह॥ कस्तां वरम इति
। गजतनय इति कः विख्यातः इभः स्तंबेरमः पद्मी त्यमरः। ७॥ कलभः। कलभः करिशावक इत्यमरः। हरिण
मृगः। स्फुटं यथा स्यात् पृच्छति। ७॥ एणा मृगा अद्दि। एण वणयालंआ। अभिनव नगरीचा। समग्गसाकुणो स
मग्गसाधवः सर्वसाधवे। केण। केन। उज्झइं।   उज्झंति। परित्यजंति। कलभएण। करभयेन। भागधे
यः करो बलिरित्यमरः॥ ६० इति संस्कृत पै   शाचिकं। इदानीं संस्कृत मागधिकमुदाहरति। को
पारुणमिति। सर्वकाष्ठा प्रतिष्ठित तनोः पूर्वदि   शि प्रतिष्ठिता। तत्र यः प्रसरः। तस्या दिशः स्तु ककुभः
काष्ठा इत्यमरः। अरुणाग्रसरस्य अरुणः अग्रसरः अग्रेसरो यस्य सः पुरोग्र हौतो। ग्रस्तमत्र इति अ
लुग्विधिर्विकल्पिक इति न्यासः। यस्य तस्य सूर्यस्य कोपारुणं कोपेन अरुणं आरक्तं उपमानमात्रं किं
भवति॥ ७॥ कपिलपनं। कपिसुखं कोपरुणं कोपेन अरुणं आरक्तं उपमानमात्रं किं भवति। ७। कपिल
पनं। कपिसुखं। आननं लपनं सुखमित्यमरः। सगरस्स मरणे। सगरस्य राज्ञः। तुरंगमख्खे। तुरंगमार्थी
किं पइस्सादहिं। किंप्रविशाङ्गिः। प्रत्रोहिं। पुत्रैः खाणाणन्कृ। एण नामरणं पत्तं। मरणं प्राप्तं॥ कपिलपनं। क

कपिलस्यमुनेर्वनं।मित्यर्थः॥६१ अन्यदप्याह॥ कंप्रीणयंतीति।जलदाः।मेघाःकंप्रीणयंति।आह्लादयंति।उ॥
चातकं।सारंगं।अथसारंगस्तोककश्चातकः।समानइत्यमरः।समरातूरणात् कीदृगैकूसैन्यंपलायात।उ॥का
तरं।अधीरं।अधीरःकातरस्त्रस्तुर्भीरुर्भीरुकभीरुकाइत्यमरः।शिरा धराग्रीवाकिंधोता।उ॥कंमस्तकं।रुद्दसिरं
।रुद्रस्यशिरःकरिसदृशकीदृशंभवति॥उ॥चातकंकातरंकं।ज्ञातगंगातरंगं॥६२ इतिसंस्कृतमागधिकं॥
ठ॥इदानींसंस्कृतालौकिकमुदाहरति।कावर्णाद्यइति।वर्णाद्यः।वर्णानांआद्यःकः।उ।अः।अकारःजलधि
सुता।लक्ष्मीःगक्कवर्तीति।उ।ए।कृष्णेदीर्घादि। संसक्तंवप्राकुः।आदिशब्देनस्तुतः।उ।अवं।प्रत्याह
रविशेषं।असोबुद्धःकमजयत्।उ।मारं।मदं। नं।नाक्लिकिः।कक्रियंते।उ॥वादाः।पद्धप्रतिपक्षप
रिग्रहावादाइति।किः।आमंत्रः।उ।हवोहेप क्लिनूहउवाचिकिंपदंविदितं।कथया।उ।हि।हियम
स्मा।कारणादिसिति॥जाणेद्वेउं।यानवितुं।इयंअशएति।आगच्छति।साविसापिमहिलास्त्री॥कीस॥कीदृशी
बोह्लिश्वक्लि।उ।अएसखि।चस्मारं।मृदंगं।मृक्करिधरित्र्यां।उच्चमोरशब्देनमुरजविशेषः।तंवादावदितं
वादया।महिषीतिपाठे।नर्त्तयितुंएतिसाकिंवदति।अएमृदंगंवादय॥६३ अन्यदप्याह॥श।इइति।पुरुषव
चनां।पुंवाचकः।शब्दः।कःस्यात्।उ॥नापुमान्स्मरारिः।ईशस्यकुंडलोको।उ।अहीसप्पो।कुंडलो।वर्ण्यवि २७
घ्नमित्यमरः।हरिःकृष्णः।अघोघःसकाशात्कामुदहरत्।उद्धृतवान्।कउकुं।इइथी।इदजाति।विवि

वीवक्षेणारःसामोविवधावीवक्षावित्यमरः॥उ॥हेणाराहेणरडानराः।हडीकुंडी।हेडिकाकुंडिकाचनास्ति।कीसकम्मिनि
।अम्हाण।अस्माकं।एच्छं।इछं।जेघुछिह्नाजेपृष्टाः।निपुणपरिहाररुत्तरं।तेषुनःपरिहारोत्तरंकीसादंति।कीदृशंददति।उ
।नाहीकुंणारा।नास्तिकुंजकारःतावतिशेषः।कलालं॥६४ इतिसंस्कृतलौकिकं।इतिचित्रजातिः॥इदानींसंस्कृतद्वयमुदाहर
ति।कोणिवसते।कोणिवसछंदं।संसुंदरगिरिगह्वरणकुंजमञ्झम्मि।कःनिवसतिस्वछंदं।सुंदरगिरिगह्वरनकुंजमध्ये॥उ॥सर
भससवराहवग्गो।सरभाःअष्टपदाःजीवविशेषाःससाःशशाःवराहाश्चातेषांवर्गाःसहअजुणणजोधुं।अ
र्जुनिनसहयोद्धुंसिद्धिगमणो।करिसोद्धुं।उ।शिखिग मनस्कंदः।कार्तिकयःकीदृशः।अन्नतासरनसशब
राहवाग्यःअथवावसगमणं।इतियागेवृषगमनःई॥ शःकीदृशःअनेत।उ।सरनसंयथास्यात्शावरात्
वशावरसंग्रामेअग्य।अष्टःनेदाकिरातशावरस्त्रलिंदाम्ल हजातयइत्यमरः॥६५ अन्यदप्याह॥कादृरदमणंपद्म
णणा।गुणागुणजुवणसलाहणीयस्स।गुलगणायोवनश्लाघनीयस्यपस्तुःमनकादरति।उ॥सरिसवकुआसहशावधुका॥
वधुएववधुका।कअचउचउबाासहाकु।आसाकेरिसा।होहा।कृतचटचटेतिशब्दाःकुताशाभवंति।उ॥सरिसवकुआ॥
सर्षपकुताः॥६६ इतिशुद्धप्राकृतं॥इदानींशुद्धापभ्रंशमुदाहरति॥पाणिग्गाहणाणियंसएसोहडाकहिंमंडियमुपा॥
णिग्रहणानिवसनेवस्त्रांकेमंडितं।नकुशोभते॥उ॥समरंगणेहिं।समानरागकराणेःउत्यरंगाणेरंजनैःसादसवई
हुविवीरतइवइरिअवस्तुकहिंधरवंडियजा।दवीरतइवयासदसहृदमपिरिसुवलंशत्रुसेनयाकेःखंडितं॥उ॥समरं

ग्गणं हिं समरंगणेः समरभूमिभिः॥ अन्यदप्याह॥ ६७ रसिअ अहं केण उच्चाडउ सुविज्जइ। रसिकानां केन तु त्राटनेकि
यते॥ ७॥ नीरसराएण। नीरसरागेण। नीरसशब्देन तु अहं हि मा अ सु केण न विज्जइ। सुवतीजिः नतरुणीभिः मनुष्यः केन
उद्धूयते। नीरसेव त्रागो न वति। तदा सुवत्याः मानू उद्वेगवानू क्रियत इत्यर्थः। तिस्विन लोअर विणिकेण सुद्दिऊइ। रमि
तो लोकैः कृणकेन सुखवायते। अथवा सुखवानू क्रियते॥ ७॥ नीरसराएण। नीरससंयुक्तेन शरावेण। शरावो वर्द्धमान
कः इत्यमरः। एकुपएह मकुम्तुवाएण गिज्जइ मम एष प्रश्नः भुवने गीयते॥ ६८॥ इति शुद्धापह्नवं॥ ॥इदानीं शुद्धाप
श्नाचिकमुदाहरति। सुअलेमद्दंतु चडइ श्शुकरः मध्ये शृच्छति। मदे वितंतदासु अलं। मेघोपितं तथास्मकरं
पृच्छति। किमिस्तुजयोः प्रश्नो। नावेवा हकणाद्द आस यलसुआकनहताः सगरसुताः इतिवराहप्रश्नः।
अतश्चवराहं संबोध्य उत्तरंदेयं॥ ७॥ वलाहकवि॥ लिणा जो वराहक पिलनकेण उ णेण विसइ पायालो
जनः केन पातालं विशति। इति मेघप्रश्नः अतश्च मेघं संबोध्य उत्तरं देयं॥ ७॥ वलाहक विलिणा हे वलाहक। विलेन
रंध्रेण॥ ६९ अन्यदप्याह॥ धवलु जलेहिं कहिं सोहइ धलणीसमाणा दसस्य स्मशानप्रदेशस्य धरणी पृथ्वी॥ धव॥
ला ह्वालेः शुक्लनिर्माल्यैः केः शोभते। ठक्कोलशब्दः निर्माल्यवाचीसुक्तादिपर्याये चेन अमारणा निधनानू॥ ७॥ नत्ल
कलंक हिं नराणां करंकेः अस्थिभिः दः णरयस्सरक्खवाला कहिं परिवहिया कूति नरकस्य रक्षपालाः के परि
वृष्टितान वंति॥ ७॥ नलकलंक हिं नरकस्य रंकेः दीनेः॥ ७०॥ इति शुद्धापशाचिकं॥ ७॥ इदानीं शुद्धमागधिकमुदा

२८

हरति॥ परीखुञ्चदेककने। राचतिकसनोरवनो कहिं। विरीप्छति गगने कस्सोघनः कें राजते॥ ७॥ अदित पएके हिं हे अदित॥
शात्रो। पक्षिभिः अर्थात् काकेः सञ्चाइनके हिं समछंति नियतं कृता इपि। सत्यानि कृतान्यपि निश्चितं केन समर्थ्यते॥ ७॥ अदित प
एक हिं अदितपाकेः शत्रुपाकेः॥ अन्यदप्याह॥ ७१ पहूणं किंफर अनो निधनेहताना अशासनं फच निचंपनिस्तनस्स। नि
धनेमरणेसति हतप्राणः जटजनकिं प्राप्य उं निष्ठदनस्य इंद्रस्य अद्धासनं जनति॥ ७॥ विसमरणं॥ विषमरणं॥ विषमश्मसा
रणश्चतं कगिनसुद्धो नो न्ह नं घोरतरदुः खसआइ या वामोहं धकारगगने। लपकिंफलंति। भुञ्चाघोरतरदुःखशतानि पाप
ः नराः मोहांधकारगहने किल जंत। कथय॥ ७॥ विस॥ मरणं॥ विषेन मरणं। पापिष्ठानां अंत्यकाले विषेन मरणं न
वतीत्यर्थः॥ ७२ इति शुद्धापशाचिकं॥ इदानीं शुद्धचूलि॥ किकमुदाहरति॥ जाणी आणइ णिद्दा जंनलि। सा किंसि
सुचइ वो च्छरे सजलि। या नया नातिनिद्रा विह्वला सती सा कीदृशच्यते॥ स्फटवा। वदान॥ सुतेली। सुभिषोलाला। ले
के पिसुतेलीति उच्यते। जो तिलसरिसवा पलइ जाणी का संनगिजइ सा विसाणी ज्ञानीयस्तिलसर्षपानू पीडयति स कीह
गृजनएपते विज्ञानी॥ ७॥ सुतेली॥ सुतेलिकः॥ ७३ इति शुद्धचूलिकिकं॥ इति संकीर्णजातिः॥ इदानीं स्वनिर्मितप्रश्नमागम
ति गढ़न वृंद्दर्शयितुं सर्वानपि च जनान् तत्र तत्र प्रवर्त्तयितुमाह॥ एतावतेति। मया एतावता उक्ता एतावन्मात्र कथ
नप्रश्नानां दिग्मात्रं यद्धानि मात्रं दर्शितं॥ अतश्च तद्विदः प्रश्नावशारदेः निश्चयेन येन प्रकारेण यथा ज्ञात्वा माद्यंत। मोदंत
०। नसदेवस्ववशास्या अनयादिशा कल्पतां। तर्क्यतां॥ ७४॥ ॥इति दुर्गकृतायां विदग्धमुखमंडनस्य टीकायां आगमत

तस्तृतीयः क्लिष्टपदच्छेदवान् परिच्छेदः॥७॥३॥ ॥७॥ इदानीं क्रमप्राप्तां प्रहेलिकामभिधातुं तल्लक्षणमाह॥ व्यक्तीकृ
त्येति। स्वरूपार्थस्य गोपनात् स्वरूपस्य कलशादिरूपस्य अर्थस्य गोपनात्। आच्छादनात्। कमपि स्वरूपादिरूपं अर्थं व्या
क्तीकृत्य प्रकटीकृत्य यत्र वाक्ये पुरुषार्थप्रतिभासके। वाक्यांतरात्। अन्यद्वाक्यं वाक्यांतरं तस्मात्। पयः इत्यर्कं भ इति वा॥
क्यांतरात् अर्थः कथ्यते। सा प्रहेलिका॥१ इदानीं तस्या एव प्रहेलिकायाः द्विविधमभिधातुं तल्लक्षणमाह॥ सतीति। सा च
प्रहेलिका आर्थचकारः। अपरः समुच्चयोर्थः द्विधा भवति॥ द्विप्रकारा। आर्थी। शाब्दी। भवति द्विप्रकारा प्रश्नध्यासने प्रश्नग्रा
स्त्रशास्त्रि शिक्षयति। अव्युत्पन्नात्। अतः शासनं। तं भविख्याता। कथिता। कथमित्याह। अर्थविज्ञानात् अ
र्थमात्रपरिज्ञानात् आर्थी प्रहेलिका। शब्दविभंगतः॥ शब्दस्य शास्त्री इत्येवंरूपस्य विभंगतः विशेषविच्छेदात्
शास्त्री इत्यपि भवतीति शाब्दी प्रहेलिका॥७॥ यथा॥ त्मिकापि भवति॥२ इदानीं क्रमात् आर्थी प्रहेलिकामुदा
हरति॥ तरुण्येति। सर्वदा जघनस्थूलं जघनप्रदेशं आश्रितः कश्चन॥ क्लीबे तु जघनं पुर इत्यमरः। तदस्तु तरुण्या कांतया आ
लिंगितः। आश्लेषितः। गुरूणां श्वश्रूननांद्रादीनां सन्निधानेपि समीपेपि मुहुर्मुहुः वारंवारं कः कूजति। इत्युक्ते कश्चन
पुमान् रत्यादौ प्रवृत्त इति ज्ञायते। स चाभिप्रेतोर्थो भवति। किं तु उदकपूर्णः कुंभ इति॥ उदकाहरणसमये कूजनं भवत्य
स्य॥ गुरुसन्निधानेपि नदीतीरसर्वत्र अपि उदकार्थमायांति। तत्र साकाक्रिया भवत्येव लिंगनादि स्वर्वी॥३ अन्यद
प्याह॥ आपांडुपीनेति। अपांडु। आसमंतात् पांडु गौरं पीनकठिनं पीनस्थूलं च पीनं पीवरं स्थूलपीवर इत्यमरः। तत

मूए

कठिनं च। कर्कशं कठिनं क्रूरमित्यमरः॥ वर्तुलं निस्तलं वर्तुलं निस्तलं वृत्तमित्यमरः॥ सुमनोहरं रुच्यं कांतं मनोहरं रुच्य
मित्यमरः। अतश्च सस्पृहं सस्पृहा। इच्छा तया सहितं यथा स्यात्तथा॥ इच्छा कांक्षा स्पृहेहा तृड् इत्यमरः॥ हार्दिरपि वयो हार्दिरपि कारः
अत्यर्थं आमृश्यते परामृश्यते। परामर्शो नाम स्पर्शनमिति क्षीरस्वामी आख्यत्॥ मृश परामर्शने॥ किमतदिति स्पर्शनं क्रियत
इत्यर्थः॥ इत्युक्ते वाक्येन स्तनप्रतीतिः॥ इदं तु पक्वबिल्वफलमभिप्रेतं॥४ इत्यार्थी जातिः॥ इदानीं शाब्दीमुदाहरति उर्वीरति॥
उर्वरिवीर्य दुःखनवा यत इति उर्वरिं वीर्यं बलं यस्य सः तस्य संबुद्धिः। वीर्यं बले प्रभावे चेत्यमरः॥ व्रियसरुषि सक्रोधे सति॥
सपत्नहृदये विरिहृदये या प्रसुप्ता शयाना षोडशवार्षि की। कृशा चटै त्रिसुप्ता। मोहरि कृशा वित्यमरः॥ सुपयो
धरा च शोभनो पयोधरो यस्याः सा। पद्मे। सुष्ठु चतत्रूप यश्च तद्धरतीति सा का॥७॥ शास्त्री॥ स्याच्छस्त्री चासिपुत्री च
च्छुरिकेत्यमरः। पुनः च यत्र दृष्टे प्रसन्ने सति किंविशि॥ ष्टे। प्रणतशत्रुसरोजसूर्ये। शत्रव एव सरोजानि तेषां सू
र्य इव सूर्यो भवान्। तस्मिन्। सिवचारुश्री। आद्यवर्णरहिता॥ इति आद्यो वर्णः तद्रहिता। का नाम स्यात् वद कथय॥७॥
स्त्री। शास्त्री। शास्त्रीत्येतस्य पदस्य भंगात् शाब्दी॥५ ॥अन्यदप्याह॥ सादति। सदा। अरिमध्यापि। वैरियुक्तापि। नितांत
रक्तापि नित्यं सितेव। यथोक्तं वक्तीति यथोक्तवादिनी अपि नैव दूती॥ एवंविधा कोता का नाम। आशु निवेदय। एतीति विचक्ष
णैः पासरिका भ्रांतिः। इदं तु का। सारिका। पक्षिणी। यथा शुकः वचनचतुरः तथा इयमपि सारिका। अत्र निमता इष्टा
सारिकया। एवं योजना। सदा। प्रथमतः सकारं ददातीति सदा। रिमध्या रिकारमध्या। अत्र रक्तापि स्वयं सितेव वर्णेव॥

वद्धाऽर्जुनौ सितौ वित्यमरः। तथा कांता। ककारः अंत्ये यस्याः सा॥ इति शाब्दी जातिः॥ इदानीमुभयात्मिकामुदाहरति। नीर
सत्तुणवक्रगुणवत्तु। नीरसः। वक्रगुणवत्तु। नीरसवक्रगुणवानुपमइणि रंतरुणिञ्च लुकुंतेत। भ्राम्यति निरंतरं।
निश्चलो भवनूतरुगिज्ञाइउणगअफलमुस्तुवस्तु। सस्तुनः तरुर्गीयते। गतफलपत्रः जोपरिज्ञाणइया वस्सो जस्तु। यः परि
ज्ञानाति। स यशः प्राप्नोति। गुणरुरको। गुणवृक्षः। रूपकोगुणवृक्षक इत्यमरः। अत्र प्रथमतो विरोधः उद्भावनीयः। नी
रसश्चेकथं गुणवानित्येको विरोधः। भ्राम्यति च निश्चलः। कथमिति द्वितीयः। तरुश्चेत् पत्रफलरहितः कथमिति तृतीयः
अत्र परिहारः। सोपि नीरशायो भवति। तथा वक्र॥ निश्चरक्रुजिबोद्धा भवति। तथा निरंतरं देशे देशे भ्रा
म्यति। स्वयं प्रवदतो निश्चलश्च। तथा यत्रफलरहितः। तथा गुणवृक्षः इति तरुशब्देन निर्दिष्टश्चेति वि
रोधपरिहारः। नीरसत्वइत्यत्र पदभंगात् शाब्दी अत्र अर्थपरिज्ञानात् आर्थी च॥ अन्यदप्याह॥ घरि
घरिकुल्लइस अलपिआरी। गृहे गृहे भ्राम्यति व्रजति सकलप्रियकारिणी। जिम तुहुं वरि अलो अर्हंणारी। य
था तव वैरिलोकस्य नारी भ्रमति। वञ्झइमुञ्चइखणएक्के ह्ली। क्षणे बध्यते एकाकिनी क्षणे मुच्यते। तदजाणं कुजद
जाइणापट्टी। तथाजानीता तथा प्रेरितापि न याति। अत्रापि विरोधः। गृहे गृहे भ्राम्यति च तु सा सकलप्रिया कृत इ
त्येकः। बद्धा च तु मुक्ता कथमिति द्वितीयः। उत्तरं। पापा सा रिभसा गृहे गृहे। भ्राम्यति। सकलानां द्यूतकला भि
ज्ञानां प्रिया च भवति। क्षणे बध्यते। मुच्यते चेति विरोधपरिहारः। अत्र सकलेत्यत्र शाब्दी विभंगतः शाब्दी विशेषार्थो

५०

+ अर

वगमादार्थीचएवं उभयरूपा॥ ८॥ इति उभयरूपप्रहेलिका जातिः॥ इदानीं कालसदादिकमभिधातुं ग्रंथकृत् प्रतिजा
नीते। कालसारादिकमिति। कालसारादिकं। कालरूढं साररूढं आदिशब्दात् रागद्वेषरूढं इत्यादि उदितं वंइदयो॥ मारादि
रूढकं। अजरूढं मादरूढं। माररूढं। कंदर्परूढं। आदिशब्दात् रूक्षरूढं। दुर्विदग्धानां दर्पशांतये विदग्धाः कुर्वीत॥ ९
॥ इदानीं क्रमाद् उदाहरति॥ अरुणे इमिति। सरागचरणायाः सरागश्चरणो यस्याः सा तस्याः मानिन्याः चरणं अरुणे त्वं अरु
नयं कर्तुं दयितः प्रियः यावत्पतितः तत्क्षणे तया सः कस्मात् अवधारितः सामानि न्यस्तोति ह्रीकृतः। इदानीं रजोदोष
समयो वर्त्तत इति कालरूढं॥ १० इदानीं साररूढमुदाहरति। अवलोकेति। वक्षःस्थापायाः गुंजाफलविभू
षणा। गुंजाफलान्येव भूषणे यया यास्तीति थोक्ता॥ स्तानो अवलोक्य व्याधकुटुंबिनीश्वश्रूः निश्वस्य कृतः
रादिक्तं लग्ना रादिक्तं प्रारब्धा। अत्र मस्तुत्रस्य सा राबले च तु। स्तनोमुक्ता फलभूषणा स्तनः अतः सा
रसूढं। सारो बलस्थिरांशे चेत्यमरः॥ ११॥ इति साररूढं॥ इदानीं रागद्वेषयुग्मस्तुदाहरति। दरदिहेति॥ दरदिह
त्त अमलंपिअसहि आदिविरहिणि सहिअ। ण मि तं किं ह्रि न रुत्रत चरणाददो कतो। ईषद्दृष्टा
मुकुलां। ईषद्दृष्टानि आम्रमुकुलानि यथा यो सा तथोक्ता नां। कुड्मलो मुकुलो स्त्रिया मित्यमरः। विरहिणी
सखी प्रेरिता सखी। हिः अशोकवृक्षः न मितः नमस्कृतः। कं किंह्नि रशोकः इति हेमीनाममाला यो। अतश्चरणाद्
तः कस्मात्। मुक्तावस्थायां मदनमहोत्सवे कुसुमितो रसालः प्रलम्यते। कुसुमवर्जितः अशोकस्तु चरणा

न्यां ताड्यत इति कामशास्त्रसंप्रदायः। विरहिण्यास्तु तद्विपरीतत्वेन सुखहेतुत्वात् अशोके प्रणितिः। अखर्वखेदहेतुत्वात् रसाले तु च
रणप्रहार इत्येवं अशोके रागः सप्ताले द्वेष आदिशब्दलभ्य रागद्वेषगूढं॥१२ इति रागद्वेषगूढजातिः॥ इदानीं द्व्यर्थजातिगूढमुदाहरति।
पेछंतमणिमिसिक्तं पछिअवकुइआइं भत्तिनिज्झाहरं। दंसिअ कआइं सीसोकंत्तोदोल्लाइं कुसुमाइं। पश्यंतं अनिमिषाद्वंद्वं यथास्या
स्तथा॥ निद्वाचरं। निद्वां चरतीति तं प्रेक्ष्य झटिति शीघ्रं दक्षकथा तं दर्शयित्वा हृजातीकुसुमे कृतः ची॥ धिक्कृते। अनेन नयकुलक्षुद्रक्षापना।
र्थं सितकुसुमद्वयक्षरणमिति केचित् तन्नानुपपन्नं दंसिअ आ इति विरोधात्। अतश्च जातीकुसुमद्वयक्षरणेन तु संकेतस्थलसदृश्यस्थलना
र्थं तन्नयत्रापि गत्वा आगतास्मीति भावः॥१३ इति द्व्यर्थजा तिः॥ इदानीं अजगूढमुदाहरति। रविसुतेति। रविसुतस्तुतगो
कर्णः रविसुतः कर्णः तस्मिन्कार्णस्ये रुताः गोकर्णाः चक्षुं द्धुश्च वसः येन सः अत्र गोशब्देन चक्षुरभिधीयते स्वर्गेषु पशु
वाग्वज्रादिदङ्त्रा। घृणिर्जले लक्ष्यदृष्ट्या स्त्रियां पुंसि गो। रित्यमरः॥ श्रुतिविषयगुणोऽम्बरः। श्रुतिविषयशब्दः गुणो यस्य
तत् गगनं तदेव अंबरं वस्त्रं यस्य सः दिगंबर इत्यर्थः॥ अंबरं व्योम्नि वाससीत्यमरः। धराधरः। धरा पृथ्वी सैव आमास्वरूपं तस्य धरति।
बिभर्तीति धरः। नरकशिराः। नराणां कानि मस्तकानि शिरांसि यस्य सः तथोक्तः। नरमुंडमालाधारित्वात्। असमरुक्पाणिः। अस्त्री शूले
रुगायुधमित्यमरः। कोऽसौ केः लक्षणया असमशब्दानुपपत्तेः त्रिशूलं तदेव पाणौ यस्य सः ईशः। अखिलं जगत् चिरं बहुकालं अ
व्यात्। रक्षतु अवतरणं॥१४ अत्र अजगूढं॥ इदानीं मारगूढं उदाहरति॥ क्रुधेनेति। क्रुधेन स्पर्शी नयनाश्रयाशात् दग्धमनादादर्ड
रद्दर्षकाले। कुः पृथ्वी तां धियति पालयतीति कुध्राः महीध्राः। तथाहि नः स्वामी हिमाचलः ततः सुतः इति सुता गौरी तां प्रीणयतीति श्रीं ई

४१

वाः तस्य नयनमेवाश्रयाशो वह्निः तेन दग्धः मदनः तत् न जातो मदो दर्पो येषां ते मयूराः। दर्दुराणां मण्डूकानां दर्पकाल इत्यर्थः॥ भे
कमण्डूकवर्षाभू शालूरप्लवदर्दुरा इत्यमरः॥ खजनूनेनो नह्य प्रियजोजना याः स्वस्मात् जन्म येषां ते खजन्मानः तत्र नाः तएव प्र
त्याः प्रियाणां तरुणीः तएव प्रियेजो जनंत च आशा रुग्णाये षां ते तथोक्ताः। आशारङ्गा पिपाशा चेत्यमरः। यकाराजा वर्तु खजनमनो नह
यं तीति समासः। जीमूतुः भगोजः नाजः संतः। भीमस्य अनुजः कनिष्ठः अर्जुनः तत्संज्ञकः गोजः गविष्ठ धौंधांजातः मदीरूक्षः दंतजं
तीति अर्जुनि रूद्धस्थिताः संतः नृत्यंति। अंगविक्षेपमात्रं कुर्वंति। नृती गात्रविनामे। अत्र मारस्य कामस्य प्रभावात् नृत्यंति इति ज्ञायते
॥ अतः मारगूढं॥१५ इदानीमादिपदसामर्थ्यात् सूचितं गू ढमुदाहरति। वाताशीतीति। वाताशी इति वा तमश्नाति इति वातात्
सर्पः। तस्मिन् आर्तिः आयनेयस्य सः। आीड् स्वप्ने इत्येत॥ स्मात् वह्निन् सर्पशायी इत्यर्थः। अराणि विद्यांत यस्मिन् तत्
अरि। चक्रं। ततु ध्रियते अनेनेति अरिध्रः। मद्रासिः मद्र नअसिः नंदको यस्य तथोक्तः। तृणां खड्गे तु निस्त्रिंशचंद्रहा
सासिअष्टय इत्यमरः। मद्रासुरिति यावेग मद्रांतः असवः प्राणाः यस्य सः तथोक्तः। वीडव्याड्यानोकाः। वीनूपक्षिणः ईशः ई
शाः ऐश्वर्याणि ऐश्वर्यणग्राक्तिवीट् गरुडः अरुणाद्युदकेस्युराजात अपोवारजा। अवात् सम्मुखः यानं वाहनं न कः स भवयानोक
सी॥ पूर्वं वाहने अपरं ख्यैः अटट्ठ्मित्यर्थः। नकः सद्माश्रयश्चौकाः इत्यमरः॥ वीडव्याड्यो यानोकसी यस्य सः वीडव्याड्यानो
काः। गरुडयानः समुद्रौकाश्चेत्यर्थः॥ वाः उदकं महतीति वार्वाहः मेघः तद्वत् आभा यस्य सः तथोक्तः। वार्वारि सलिलं कम
लं जलमित्यमरः॥ असौ हरिः निराकृतं अनः आकटोयन स तथोक्तः। असुरद्विपाणः। जीवनः आकंटोस्त्रीस्यादित्यमरः॥

शाकृताखुरोद्दतइत्यर्थः॥एवंविधः।ईदयितः।इलक्ष्मीःतस्याःदयितःप्रियःकृष्णःवःजवतांअशंअसुखेअरेअत्यर्थंहरतात्
।अत्रकृष्णस्यमुग्धतयाविद्यमानत्वात्आदिपदसामर्थ्यात्कृष्णगूढकं॥१६ इदानींक्रमप्राप्तंपदगूढमुदाहरति।दयावानि
ति।दयावान्।दयाविद्यतेयस्यसः।प्रयतःपवित्रः।प्रयतःपूतइत्यमरः।शुद्धःनिर्मलःप्रबुद्धकमलेक्षणःप्रबुद्धेविविकसिते
कमलेइवईक्षणेयस्यसः।ईक्षणंचक्षुरितिद्विणीत्यमरः।पायापदः।पापेअपदंतीति।एवंविधःबुद्धःसर्वज्ञः।सर्वज्ञःसुगतोबुद्ध
इत्यमरः।त्रिभुवनं।त्रिलोकीअपायतःविपदःसकाशात्पायात्रक्षतात्पारक्षणा।अत्रचतुर्थचरणेविधीयमानानिबुद्ध
इत्यादीनित्रीणिपदादीनिअवशिष्टचरणत्रयेगुप्तेवा॥ ईतिइतिपदगूढकं।अत्रपदगूढंनचिवक्षितं।नदग्धपुनःव
क्ष्यति॥१७ इदानींपादगूढमुदाहरति॥नमजतीति।क चिद्दोषेकस्मिन्नपिदोषेनमजति।नमग्नोजवति।जगतःलोक
स्यमनःचित्तंप्रीणयतिदोषयति।यएकःसन्एवंकरोति सःश्रीमान्लक्ष्मीवान्सज्जनःपरंअत्यर्थंचिरंबहुकालं।
जयतिसर्वोत्कर्षेणवर्तते।डिजयेधातुः।अत्रचतुर्थचरणाक्षराणिचरणत्रयेवर्तंतेइतिपादगूढकं।अत्रपदगूढात्पादगूढ॥
त्यादगूढस्यभेदःविवक्षावशात्॥१८॥ इदानीमर्थगूढमुदाहरति॥दृष्टइति।मयादृष्टःस्वप्नइतिशेषः।कुसखिबुद्धि
नइतिशेषः।अद्यमेरोदयिवागतः।इत्युक्तवतीविरहिणीप्रतिभर्त्रवदेनदेसुंदरिचंकल्याणिनीरुयाआननस्वप्नेन
तिजावः।स्वोक्तिदृष्टांतेनदृढयतिसखी॥अतिनिर्मलांप्राचीपूर्वदिशंपश्य।अत्रवियोगिन्याःप्राच्याःपुनःसूर्यसंसर्गइव
नवापिदयितसंसर्गाभिवितेति॥अर्थगूढकं॥१९इदानींद्वितीयमुदाहरति।दाक्षिणेति॥दाक्षिणपवणाग्निमा।दक्षिणय

४२

व२

वनोद्वियासम्मीलइलोअणाइंपद्दिअवहू।सम्मीलयतिमीलसीलक्ष्मीलनिमेषणेलोचनेपथिकवधूः।णिनणसदीन
णतीए।निघ्रणसखीपुनःसैस्याकंठंविकारदिज्ञाशिढक्कोइ।कंठमपिकरात्यांजटितिस्थगयति।वियोगात्कंठंगताअपिप्राणा
ःयथावहिर्ननिष्क्रामंतीति।अर्थगूढकं॥२० इदानींस्तुतिनिंदतितथाह्यर्थंअपकृतिंचाभिधातुंतल्लक्षणमाह।स्तुतीतितदर्थ
ता।स्तुतिनिंदजवतः।अर्थद्वयादयात्अर्थद्वयस्यउदयात्प्राकृतवितंद्व्यर्थंजवति।कथितस्यापिनकार्थस्यापिनिह्नवात्।अ
पलापात्।अविश्वासेपह्नवेपिनिह्नुतावपिनिह्नवइत्यमरः।कस्मात्व्याजात्।शाद्वलात्अपह्नुतिर्भवति॥२१ इदानींक्रमा
तविज्ञोःस्तुतिनिंदआद्या।बहुदोषइति॥बहुदोषःबहु वादोषाः।यस्येतिनिंदायां।स्तुतौबहवःचतस्रःदोषाः॥
भुजायस्यसः।दोषाभुजेचराच्यांत्वितिद्वेमी।अमरस्तु। षकारांतमेवदोःशब्दंपयाठगुणध्वंसीनिंदायांस्फुटमेव।
स्तुतौतुसवरजस्तमांसिध्वंसतीत्येवंशीलःगाहंता॥ स्फुटनिंदायां।स्तुतौतुजनान्राक्षसान्पीडयतीतिजन
स्थाननिवासिनामित्युक्तत्वात्।विरथःरथरहितःइतिनिंदायां।स्तुतौविःपक्षी।अथतिगरुडःरथोयस्यएवंविधःकृष्णःआ
श्रमदोदयंआशःप्राशःमहान्उदयोयनसतथोक्तंलोकंअस्तंक्षिप्तंनिराकृतंकरोतुइतिनिंदायां।स्तुतौतुअसंतोस्तंलोकं
आश्रमदोदयंकुरुतामिति।यतोदीनोद्धरणाचितः॥२२इदानींराज्ञःस्तुतिनिंदआद्या॥सततमिति।सततंतादृअहितजन
वत्सलः।अहितजनानांवत्सलतस्यसंबुद्धिः।अथवाबहुव्रीहिःइतिनिंदायोस्तुतौ।सततंमहितानांपूजितानांजनानांवत्स
लबहुव्रीहिर्वा।बहुनयपायक्रियारहितइत्यर्थः।इहकलिकाले।कुपतिः।कुःपृथ्वीतस्याःपतिःइतिस्तुतौनिंदायांतुकु॥

क्षितेः पतिः चंद्रः जगतः लोकस्य परमं च तत् दुःखं च तत् करोतीति निंदायां स्तुतौ स्तुपरे अत्यर्थे अद्रुःखकरः। एवं राज्ञः स्तुति निंदा॥ २३ इदानीं द्व्यर्थमुदाहरति॥ प्रसन्नेति। प्रसन्नवदनः। प्रसन्नं वदनं मुखं यस्य सः। चिंतं यस्य सः श्रीमान्। कांतिमान्। लक्ष्मीवान्। लब्धमहोदयः। लब्धः महान् उदयः। पक्षे अस्तु दयो येन सः। करप्रचारसुभगः करः किरणाः। किरणाः हस्ताश्च तयोः प्रचारः चकोर सुयाव केषु वा प्रसरणमेव प्रचारः। तेन सुभगः मनोहरः। एवंविधः अयं राजा नृपश्चंद्रश्च प्रजाः आनंदयति। राजा मृगांके क्षत्रिये नृप इत्यमरः॥ अत्र चंद्र नृपौ॥ २४ अन्यदप्याह॥ विनायकेति॥ विनायकाद्दितप्रीतिः विनायके गणेशे आद्दिता निहिता प्रीतिर्येन स तथोक्तः। ईशः। रुद्रस्तु। वीनां पक्षिणां नायः विनायके गरुडः। तत्र आद्दितप्रीतिः। अथवा विनायकाः अनाथादीनाः तेषु आद्दितप्रीतिः। दवः। दीव्यतइति देवः। योगंगां भागीरथीं बभार। पक्षेयं अगं गोवर्द्धिमानं पर्वतं गंस्थीं बभार। स देवः वो अव्यात्। रक्षतु॥ अवरक्ष णे। स च कीदृक्। सर्वदा रक्षतु। माधवः। उमा गौरी तस्याः धवः। उमा कात्यायिनी गौरीत्यमरः। पक्षे सर्वदः। सर्वं ददातीति। मा धवः कृ ष्णः पुनः कीदृक् अव्यर्थविक्रमः अव्यर्थः सफलः विक्रमः पराक्रमो यस्य सः। इति शंकरपक्षे। कृष्णपक्षे अव्यर्थः। पर्वतार्थः विक्रमः पराक्रमः यस्य सः। अवयः शैलं मषाकन्यमरः। अत्र शंकर वासुदेवौ॥ २५ इति द्व्यर्थजातिः॥ इदानीं क्रमप्राप्तं अपह्नुतिमुदाहर ति॥ सीकारमिति। सीकारं शिक्षयति। सी सीत्यनुकरणशब्दः। अधरं व्रणयति। रामां चेतनोति इत्युक्ते सति नायकां प्रति दूती कथयति। नागरिकः। चतुरः। मिलितः। किंतु किंतु वितर्क्ये। विकल्याः किं किमुत चेत्यमरः। पुनर्नायिका कथयति। हे सखि नहि

४७

५२

नहि हेमनः। हेमंते भवः सर्वत्राएव तल्लोपश्चेति अणि तकारलोपे रूपं। पवनः वायुः। पवनशब्दः छल्लात् कथितस्य प्रियस्य अपलापः तस्मात् अपह्नुतिः॥ २६ अन्यदप्याह॥ रुचिरेति। रुचिरस्वरवर्णपदा स्वराश्च वर्णाश्च पदानि च रुचिराणि स्वरव र्णपदानि यस्यां सा। पक्षे स्वरः ध्वनिः वर्णः कांतिः पदं चरणं च यस्यां सा रुचिरशब्दः सर्वत्रायोजनीयः। पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ रसवतीति सा तरुणी एताद्दशी कापि जगन्मनो हरति। इत्युक्ते सति तं प्रियं प्रति नक्तिः। तस्मात् कारणात् सा तरुणी किं। न हि न हि मधुरशीलस्य वाणस्य कावः वाणी भारती। बाणोच्छिष्टं जगत्त्रयमिति प्रसिद्धं। इह वाणीशब्दव्याज्ञात नायकायाः अपलापः तस्मात् अपह्नुतिः॥ २७ इति अपह्नुतिजातिः। इदानीं बिंदुमद भिधानं तल्लक्षणमाह॥ स्वरस्थितिः स्वरेषु बिंदुयुक्तेषु हल्लो व्यंजनानां यत् अवबोधनं परिज्ञानं तत् बिंदुमदिति प्राहुः। कश्चित् देवं बिंदुमद्योगतोद्यवर्णानुसारेण क्रमेणैव। कमलानेव सदातीति कथयेति इत्थं प्राश्निकः। इदि पद्यं विचार्य ततश्च तत्प लो वाबिंदून् लिखत तत्र यथाश्रुतान् स्वरान् लिखेत्। स्वराः के अनुप्रत्याहारोक्ता इति। पद्ये यावंति व्यंजनानि तावंति सकलान्यपि बिंदुरूपाणि लिखेत् न च चेत् व्यंजनद्वयं त्रयं वा भवति। तदा आद्यं व्यंजनं बिंदुरूपेण लिखेत्। अवशिष्टं उ व्यंजने बिंदोरधस्तात् लिखेत्। एवं सर्वत्र द्रष्टव्यो॥ २८ इदानीं बिंदुमत्याप्यहृद्विध्यमभिधत्ते माह॥ नाभसीति। नाभसी नमसि आकाशे अंगुल्या वत् लिखेत्। तदा नाभसी भवति। तथा च मानसी। मनसि भवा मानसी नाति। आमानसी नमसि आकाशे अंगुल्या अवत् लिखेत्। तदा नाभसी भवति। तथा च मानसी ... ज्ञानिश्चयेनया ज्ञातयो भवंति। तासां बाहुल्येन प्रा धमसादा बुद्धिः। नः अन्यत्रैव करान् त्रावष्टादि तत्र तंत्रन्यसतः ह्ये निश्चयेनया ज्ञातयो भवंति।

दैत

त्रुटयेण अप्रयोगात् प्रयोगाभावात्। इदं प्रदर्शितं तासां नोक्तं। वक्तुमशक्यत्वात्॥ २९ इदानीं विद्रुमतुं दारति। विग्ठठ
वृगवद्रं। द्वि॰ गिवृंठिगो: कुरुकूगीगविः। गवकुगगविद्रुगगकु ठठठगीगगगोगठद्रं वृ:॥ ३०॥ इदानीं एतदेव पद्ये प्रकटयति। त्रिन
यनकुठार त्वमं त्रिसिंधो: कुमुद्वतीदयित:। अयमुदयति घुसृणारुणरमणीवदनोपमश्चंद्र:॥ अस्यार्थ:। घुसृणारुणरमणी
वदनोपम: घुसृणेन कुंकुमेन। अरुणं रक्तं रमण्या: वदनं तेनोपमीयत इति। अयं चंद्र उदयति। स कीदृश:। त्रिनयनस्य
ईशस्य कुठारत्वं बिभर्ति सिंधुःरणात्। चूडामणिः शिरोरत्नमित्यमरः। सिंधो: समुद्रस्य देवो नदविशेषे सिंधुर्नीसरिति स्त्रि
यामित्यमर:॥ तस्य मित्रं। कुमुद्वत्या: कुमुदिन्या: दयित:॥ ३१ इति विद्रुमजाति:। इदानीं क्रमात् क्रियादित्रयोदशगु
प्तकमभिधत्ते तल्लक्षणं युगपादेनाह॥ क्रियादिकमिति। अत्र पद्ये पदसंधान कौशलात् क्रियादिकं स्थितं तत् स्फु
टं यथा स्यात्तथा न लक्ष्यते। लक्ष्यदर्शिनां कनयो:। तत् क्रियागुप्तादिकं भवति। इति निश्चयेन॥ ३२ इदानीं क्रमात्
दाहरति। क्रियागुप्तं। राजन्नवद्यातेति। हे राजन् नवघनश्यामनिस्त्रिंशाकर्षदुर्लयान वधीघनवत् नूतनमेघवत् श्याम
: नील: य: असौ निस्त्रिंश: खड्ग: तस्य आकर्षणं तेन दुर्लयाखड्गे तु निस्त्रिंशचंद्रहासासिरिष्टय इत्यमर:। आकल्पं कल्पं
संवर्तमर्यादीकृत्य। संवर्त: प्रलय: कल्प इत्यमर:। एतां एनां वा—सुधां तथा रणे बकृद्विद्विष: शत्रून् एतावति वाक्यप
रिसमाप्ते वसुधामिति कर्मपदं विद्विष इति च कर्मपदं सकर्मकक्रियापदप्रयोगमंतरेण अनुपपन्नमिति क्रियागुप्ति
या लक्ष्यते। अतस्थ क्रियागुप्तं उत्तरं। राजन् अवघनेति पदच्छेदे। अवरक्षाण। इति सकर्मकक्रियाविद्विष: रणे

४४

तं।४

इति पदच्छेदे तु द्योतितो। अवरखंडनेति सकर्मकक्रियात नयत्रापि लोट् मध्यमपुरुषैकवचने रूपं। अत्र पदसंधानकौश॥
लात् क्रियागुप्तं॥ ३३॥ अन्यदप्याह॥ पुंस्कोकिलेति। पुंस्कोकिलकुलस्य पिकवृंदस्य मधुरारावै: मनोहरशाखि: रम्या: मनो
हरा: एते सहकारद्रुमा: आम्रवृक्षा: वसंते कामपि अनिर्वचनीयां श्रियं शोभां। एतावदेव वाक्यं क्रिया नास्ति। अतस्था। नितां
अधुरारविरित्यत्र अयं छेद:। नितांतं अधु: आरावि: श्रियं अधु: अकुर्वन्। अकार्ष:। अधात्। अधु: अधु:॥ ३४ इति क्रिया
गुप्तकं॥ इदानीं कर्तृगुप्तकमुदाहरति। नकरोत्विति। रोषं क्रोधं न करोतु नाम परुषं कठिनं न वदतु। अयं शत्रून् नदंतु। यद्य
पि शत्रुजये राजादिकर्मसाधनं तत् अस्य नास्ति। तथा पिधीरस्य वीरस्य अखिलां महीं रक्षयति। इत्यत्र कर्ता
पूर्वदाल वर्तमानं अयमुशाव्यस्तु न विद्यति तत्र हि धीर॥ स्य वीरस्येति यद्वयं तत्र योजनीयं। अतस्य एवं छेद:।
धी: अस्य वीरस्य धी: बुद्धि: कर्त्री॥ ३५ अन्यदप्याह॥ शरदिंदुकुंदलेधवलं शरच्चंद्रवत् कुंदवत् धवलं
श्वेतं नगनिलयरतं पर्वतरुद्रवरतं मनोहरं देवं प्रसादयति त्यर्थ:॥ ३६ इति कर्तृगुप्तं॥ इदानीं कर्मगुप्तमुदाहरति॥
शीकरेति। शीकरासारसंवादी शीकराणां अंबुकणानां आसार: धारासंपात: तं संवदति त्येवंशील:। शीकारांबुकणा
स्मृता इत्यमर:। सरोजवनमारुत:। सरोजानां वनं तस्य मारुत: पवन:। पांथस्त्री निश्वासेरिव पथिकरमणीनां वि
रहनिश्वासा: भवंति। तेरिव मांसल: पुष्ट: सन् प्रद्योतयति। इत्यत्र कर्म नास्ति अतस्थ सर: जवनमारुत इति छेद:।
विगस्युक्तोवायु: प्रजवी जवनो जव इत्यमर:। सर: कासारं प्रद्योतयतीत्यर्थ:॥ ३७ अन्यदप्याह॥ खजगेति। हे खजग॥

ततव आननपंकजदर्शनसंजातनिर्भरप्रीतः मुखकमलदर्शनात् संजाता उत्पन्ना निर्भरा अधिका प्रीतिर्यस्य सः तस्य
कस्य ऋण एव तः दिवसः रमणीयः मनोहरः सन् कुर्वन् भ्रामयति इत्यत्र कर्मनास्ति। अतश्च शं अयतीति छेदः। शं सुखं कुर्वन्
अयति गच्छतीत्यर्थः। अयपययगतौ॥ ३८ इति कर्मप्रमुदाहरति॥ घ्नतिपंकेति। घनागमे सति घ्नतिपंकमये। उगंधिक दर्भे
प्रकारकासारे सरसि अत्यर्थं दुखिताः अमी हंसाः दुर्वाराः संतः दुःखन वार्यंते दुर्वाराः मानसंगमिष्यंति। अत्र दुर्वारा
इत्यत्र करणं नास्ति। अतश्च दुर्वारा इति तृतीयांतं पदं दृष्टं च तत्तु वाश्च आपः स्त्री भूम्नि वार्वारीत्यमरः। तेन दुर्वाराः॥ ३९
अन्यदप्याह॥ अहमिति। अहं महानसायातः महान सातूपाकस्थानात् आयातः रसवत्यं तु पाकस्थानमहा
नस इत्यमरः। तवान्तकरः नरबलिः अहं कल्पितः जा गधयः करोबलिरित्यमरः। मांसादिकं न दृष्टमया मु
हं। हेवकं बकासुर मां नीमं जायनी दि। इति बकासुर प्रयुक्तवान् भीमः इति कथा प्रसिद्धैव। आयात इ
त्यत्र करणं नास्ति। केन आयात इति। उ। महानसा। महश्च तत् अनश्च ततन महाशकटेनेत्यर्थः। क्लीबे नः शकटा
स्त्री स्यादित्यमरः॥ ४० इति करणमुक्तं॥ इदानीं संप्रदानमुदाहरति। अंभोरुहे ति। अंभोरुहमये कमलप्रचु
रे वापी पयसि वा अंबुदके वापी तु दीर्घिकेत्यमरः। स्नाता स्नानं कृत्वा कामिनी न। किं संपन्ना सत्या संपन्ना सती सौभाग्य
काम्यया। सौभाग्यस्य काम्या तया कृत्वा पुष्पं ददाति। कस्मै ददातीति संप्रदानेन नास्ति। अतश्च अंभोरुहं अयेह
ति छेदः। अंभोरुहं पुष्पं आयकामाय॥ इः कामः तस्मै अयेकामाय। हे कामम् स्त्रियः दधीनो नास्ति अतः एतदे॥

४५

भोरुहं कुसुमं अमुं धृत्वा दीवा अधीने कुरु मे प्रियमपीति भावः॥ ५१ अन्यदप्याह॥ असत्येति। प्रसत्या। प्रसादनयुक्तमार्ग
स्थः (युक्तः) उचितः मार्गः नीति मार्गः तत्र तिष्ठतीति। हे गुणरत्नालय गुणा एव रत्नानि तेषां आलयः तस्य संबुद्धिः ५ प्रभो
स्वामिन् तव श्रिताः सेवकाः श्रयंतीति श्रिताः समानिताः संतः संमाननां प्राप्ताः संतः के नाम। नाम प्रकाश्यसंभाव्यक्रोधोप
गमकुत्सनेष्वित्यमरः। न स्पृहसंति कस्मै स्पृहयतीति संप्रदानं नास्ति। स्पृहेरीप्सित इति संप्रदानेन च नास्ति। अतश्चात्र
सत्येनयुक्तमार्गस्थ इति पदच्छेदः। तथा च सति प्रसत्त्यै प्रसादाय। स्पृहयंतीति प्रसत्तिः प्रसादः तस्यै तु सार्वस्पृहयंतीत्यर्थः।
प्रशस्तीयुक्तमार्गस्थ इति पाठ प्रशस्तकीर्त्तियुक्तमा गीस्थ इति काकर्षो विद्यारव्या॥ ५२ इति संप्रदानमुक्तं॥ इदानीं
मयादानमुपकमुदाहरति॥ शिलीमुखैरिति। हे वीर श्वरा। दुर्वारिः दुःखन वार्यंत इति दुर्वाराः। तैः शिलीमुखैः
बाणैः त्वया निर्जितः तिरस्कृतो रिपुः शत्रुः अत्यंतम लिनः सन् कुसुमकलेवने पिविनेति भीतिं प्राप्नोति बिभेती
त्यत्र कस्मात् बिभेतीति अपादानेन नास्ति। भीतार्थानां भयहेतुरिति पंचम्या नास्त्वे अतश्च अत्यंत अलिन इति छेदः। अलिनः भ्र
मरात्। मधुलिण्मधुपालिन इत्यमरः। यः शिलीमुखभ्रमरैः अलिबाणौ शिलीमुखावित्यमरः। निर्जितास्य वतिसः
भ्रमरान् बिभेतीति युक्तं इति ध्वनिः॥ ५३ अन्यदप्याह॥ सरसीति। जनः कंदर्पकारकारकं। मदनवृद्धिकरं। सरसीतो
यं सरवरोदकं उधृत्य पिबति पानं करोति कीदृग्जलं। अंभोजसुरभि। अंभोजैः सुरभि सुरभिघ्राणतर्पण इत्यमरः। पुनः
कीदृक्। स्वच्छं निर्मलं। पुनः कीदृक् एकांतशीतलं। एकांतसर्वदा शीतलं कस्मात् उद्धृत्येत्यत्र अपादानेन नास्ति। अ

तस्या यं छेदः। सरसीतः सरसः दर्पकारकं मदजनकं कंपानीयं उसिकः कं शिरोंबुनोरित्यमरः। उद्धृत्य अयं जनः पिबति। क
मलपरिमलस्वच्छशीतलादिगुणविशिष्टात् दर्पकारीत्यर्थः॥ ४४ इति अपादानगुम्फकं॥ इदानीं अधिकरणगुम्फकमु
दाहरति॥ या कटाक्षेति। या लक्ष्मीः कटाक्षच्छटापातैः कटाक्षानां छटापरंपरा तत्पातैः मानवं मनुष्यं पवित्रयति। पवित्रक
रोति सा कमलालया लक्ष्मीः एकांतरोपितप्रीतिः एकांतरदः रोपिता प्रकटीकृता प्रीतिर्यया सा तथोक्ता। अस्मिन् वर्त्तते। अ
त्र वर्त्तत इति अधिकरणेन नाव्यं। अतश्च एकान्ते अः कृत्स्नः तस्मिन् नूकांतप्रियेरोपितप्रीतिः प्रकटितप्रीतिर्वर्त्तते॥ ४५ अन्य
दप्याह॥ विपद्यमानेति। निरूष्मणः निरहंकारस्य | सर्वजनस्य विपद्यमानता। विपद्यते विपद्यमानः तस्य भा
वः विपद्यमानता सिद्धिवत् तथा हि॥ अयं जनः पादा | न्यां निर्वाणं शांतं न स्मरंतीति निर्वाणा निद्रालो माद्रे विनाशे
गजमजने। अत्र विनाशार्थः। उष्णं चेतुः स्वष्टुमपि | न शक्नोति। कुत्र विपद्यमानता सिद्धेत्यत्र अधिकरणेन
नाव्यं अतश्च। विपदि अमानतेति छेदः। शांतस्य विपदि आपदि अमानता सिद्धा॥ ४६ इति अधिकरणगुम्फकं॥ इदा
नीं षट्कारकगुम्फकानंतरं पृथक् कृतं संबंधगुम्फकमुदाहरति। हरिणीवेति। अस्मिन् मधुमासे चैत्रे। स्याच्चैत्रे चैत्रिको म
धुरित्यमरः। रसालद्रुममंजरी इयं आम्रमंजरी। न्यस्तशिलीमुखा। आश्लिष्टशिरा। हरिणीव निषंगइवाभातिशोभात
। हरिणो पासंग हरिणी र निषंगा इषुधिर्द्वयोः। हरिणामित्यमरः। आम्रमंजरी भ्रमरासती उद्गि। भ्रमकलिः
उज्जिन्नानित्यन्नानि चतानि मुकुलानि तैः। कुड्मलो मुकुलो स्त्रियामित्यमरः। अलिबाणौ शिलीमुखावित्यमरः। कस्य

हरिणीवेत्यत्र संबंधेन नाव्यं। अतश्च उज्जिन्नमुकुलाएः इति छेदः। इः कामः तस्य एः मदनस्य हरिणीव आम्रमंजरी भातीत्यर्थः॥ ४
७ अन्यदप्याह॥ प्राप्तमद इति॥ मधुमासः चैत्रस्य। चैत्रे चैत्रिको मधुरित्यमरः। प्राप्तमदः मदसंयुक्तः रुकुविरदपीडा प्रव॥
लावलिप्राप्रियतमो पिद्दरस्थः। असती खिरिणी हतशीलागस्य नावाहर्यसखी नियतं। सन्निहितावर्त्तते। अतः परं अदं किं
करामितिस्वागतं। हा इति खेदे अत्र मधुमासश्चैत्रः प्राप्तमदः तदा अस्यां किं। अतश्च संबंधेन नाव्यं। मासः मासस्य अदः इ
दं मधु प्राप्तं। यद्दंतो मासीत्यादिना मासशब्दाद्वांजनांतः। ततश्च मासः प्रवर्त्तिस्य चैत्रस्य संबंधि मधु मद्यं पुष्परसो वा अदः
प्रारावीर्भिमया प्राप्तं पीतं अनुभूतं वा॥ ४८ इति संबंधगु | म्फकं। इदानीं आमंत्रितगुम्फकमुदाहरति। सर्वज्ञेनेति। स
र्वज्ञेन सर्वं जानातीति सर्वज्ञः। तेन। तथोक्तेन त्वया अ | विज्ञातं ईदृशं किंचिन्नास्ति। तथा च मिथ्यावचाः सन् नु मिथ्या
भूतं वचो यस्य स तथोक्तः। त्वं कचित् असत्यं नावदः। | किंतु त्वं सत्यवचाः त्वयेति शुष्मत् शब्दो निर्दिष्टात् संबोध
नेन नाव्यं अतश्च सर्वज्ञ इन इति छेदः॥ इनः सूर्यप्रभावित्यमरः॥ ४९ अन्यदप्याह॥ कमल इति। कमले कमले मधुनि पु
ष्परसा मधु मद्यपुष्परस इत्यमरः नित्यं पिबन् अपानं कुर्वतः तव दोषाकरोदये चंद्रोदये कथं संदहो न भविष्यति। चं
द्रोदये कमलं मुकुलं भवतीति तन्मकरंदपाने क्रियमाणे बंधने मम बंधनं भविष्यतीति तव कथं संदेहो न। तावत्पत्र।
संबुद्धांतपदेन नाव्यं अतश्च कं अले इति छेदः। भो अले। भो भ्रमर कं सुखं यथास्यात्तथा त्याति योजना॥ ५० इति आ
मंत्रितगुम्फं। इदानीं समासगुम्फकमुदाहरति। विषादीति। देवी रक्षरकृष्टेनापि कुष्टेनापि त्वया अरिः शांतः समः कृतः

कीदृशः शंभुः कीदृशः वैरी विषादी विषमत्तिं भक्षयतीति विषादी ईश्वरः शत्रुपक्षे विषादोस्यास्तीति विषादी। विषा
दश्चित्तभंगस्यादुपायापायचिंतानिशितिनिद्रयं। निद्रायाः सहृद्दोनिद्रयं। निद्रयं निःप्रवकं दंवकमित्यमरः। अश्रातिा भवन्
यति। सदारोगं न गुंचति। रोगं मनःपीडां सर्वदा न मुंचति। अत्र समासगुप्तेन शंकर विशेषणं। दारैः सहवर्तीत। दाराः पुंभू
म्नीत्यमरः। अगं कैलाशं न मुंचति॥५१॥ अन्यदप्याह॥ नित्यमिति। वं सस्यद्विषतः शत्रोः कृष्णस्य तनुः दैवेनित्यं आराधि
ता कीदृशी तनुः। मंडलाग्रं खड्गं कौक्षेयको मंडलाग्रकरवालः कृपाणवत्। इत्यमरः॥ गदां शंखं च चक्रं च बिभ्रती जयति॥
सर्वोत्कर्षेण वर्तीत। अत्र नित्यमाराधितेति छेदः। नि त्यामा लक्ष्मीः यस्यां सा इति आराधने देवगर्भे विशेषणं।
सलक्ष्मीकं सर्वापि सेवत इति समासे गुप्तः॥५२॥ इति समासगुप्तकं॥ इदानीं लिंगगुप्तकमुदाहरति। नितांतेति
। हे सखि। यः चिरादर्शनप्रीत्या चिरकालं यत्नत्र अद्य॥ दर्शनं ततेन उत्पन्ना या प्रीतिः तथा कृच्छ्रा त्वां समालिंगिरं स्य
त्। रमिता। ते सः प्रयाणपूर्वः प्रियः समागतः नितांत स्वच्छहृदयमिति पदं कुत्र योजनीयं। अतश्च नितांत स्वच्छहृदयमिति प
दं कुत्र योजनीयं। अतश्च। नितांत स्वच्छहृत्। अयं इति छेदः। अत्र पुल्लिंग स्त्रीलिंगं वा पुंस्त्वानि तांतं स्वच्छहृत् यस्य सः।
प्रयाणूर्थवा सखी विशेषणं संबुद्ध्यंतपदं। नितांत स्वच्छ इवं लिंगं चिह्नं प्रियस्य तत्गुप्तमिति। कचित्॥५३॥ अन्यदप्या
ह॥ कलिकेति। अत्र प्रदोषावानवा अगस्त्यस्य मुनेरपि अगस्त्यकाषरापिमानसं चित्तं दृश्यं शशिखंडानुकारिणी खं
डयति। कलिकालं। खंडयतिवा। इत्येवं अर्थस्यानिश्चये सति एवं छेदः। कलिका। अलं। इयं। अगस्त्यस्य हृदस्य इयं

शशिखंडं अनुकरोतीत्येवं विक्षकलिका मुनेरपि मानसं अलं अत्यर्थं खंडयतीत्यर्थः। कलिका अलमित्यत्र स्त्री॥ लि
गं गुप्तं॥ केचित्तु शशिखंडानुकारिणी कलिका अगस्त्यस्य हृत्कस्येव लिंगं चिह्नं भवति। तन्नूप्तमिति लिंगगुप्तः॥५४॥ इ
ति लिंगगुप्तं॥ इदानीं सु— च मुदाहरति। यदि धर्मश्च इमौ यदौ थिसिंगतौ मिलितौ भवेतां। तर्हि गृहमेधिनः गृहैः क
लत्रैः मेधंत संगत इति गृहमेधिनः। मिथुमेधुसंगमने। दारश्च गृहाः श्रेणां इत्यमरः किंच सदाराः दारैः सहवर्तंत
इति सदाराः। एवं च यो भक्त्यं भवेत्। अतश्च। सदाराः धनं इति छेदः। तदा गृहमेधिनः गृहैः कलत्रैः मेधते संगच्छत इ
ति गृहमेधी। तस्य गृहस्थस्य प्रमोदं हर्षं जनयत्येव सदा। राः। इत्यत्र सुवंतं पदं गुप्तमिति॥ इति सुब्वचन गुप्तं॥५५
इदानीं तिङ्वचन गुप्तकमुदाहरति। कस्मादिति। हे बाल त्वं कस्मात् दुर्बला कृशा असि। भवसि। इति सखीः
वदीयां तां बालो परिपृच्छति। इत्यत्र एकवचनं त्वानिः तत्र परिपृच्छतीति युक्तं किल ट्यरास्मेयदप्रथमपुरु
ष बहुवचने रूपं। परिपृच्छतीति परिप्रष्टि परिपृच्छति। इत्यत्र बहुवचनं तिबंतं गुप्तं इति हस्तांत उक्का कृतीनायकं प्रति
वक्ति हे नायक त्वयि सन्निहिते सति। तासु सखीषु किं दद्यात्। उत्तरं॥ कथय। यत स्याः प्रियः समागत एव। अतः परं गच्छ
त्वा भवत्य इति उत्तरं ददातीति दितार्थे॥५६॥ इति तिङ्वचनगुप्तकं॥ इदानीं मात्राच्युतकमादिपदसामर्थ्यात् बिंदुच्युतकादिष
ङ्मनिक्षत्तं तल्लक्षणमाह॥ अन्योप्यर्थ इति। यत्रवाक्ये मात्रादिच्युतकेष्वपि सत्सु वाक्ये कस्य चित्पदस्य ईकार ऊका
र इत्येवं एकमात्रादियाद्वा च्युरीकृतसति। अथवा बिंदुविसर्गादीनां च्युतकेष्वपि सत्सु अन्योपि कश्चस्फुटोर्थः। प्र

कटोऽर्थः प्रतीयते। प्रतीतिर्योग्यो जायते। तज्ज्ञाः। मात्राच्युतकादिविचारे ततु मात्राच्युतकं विदुः प्राज्ञाः॥ ५७॥ इदानीं तत्र मात्राच्युतक
मुदाहरति। महाशयमिति। हे जनाः खलावासात्। खलस्य क्षेत्रस्य आवासात् निवासात् अतिश्रांताः सन्तः खलं क्षेत्रे चाम्रुढोच
ति विश्वः। पाद खलानां दुर्जनानां आवासात् अतिश्रांताः संतः ये संतापनिष्टास्ते नीरमुदकं समाश्रयत। नीरमित्यत्र ईकारं निरा॥
कृत्य नरं समाश्रयतेति भवति। भवति तथा तद्विशेषणानि लगंति। महाशयः महान् आशयः आधारः मध्यप्रदेशो यस्य तत्
आशेते तिष्ठति यत्र उदकं सः आशयः जलाशयो जलाधार इत्यत्र वत्। पक्षे महानाशयः हृदयो यस्य सः। ... खः आशयः पा
णिरित्यमरः। अतिस्वच्छं अतिनिर्मलं॥ ५८॥ अन्यदप्याह। उषा रतिः उषा धवलः उषारवत् धवलः शुभ्रः स्फुरन्महाम
णिधरः। स्फुरन् दीप्यमानो महामणिश्च तं धरतीति। अनघः नि॥ ष्पापः पृथिवीधरणक्षमः पृथिव्या धरणक्षमः समर्थः
। एवंविधः एको नागराजः नागानां सर्पाणां राजा नागराजः वासुकिः जयति सर्वोत्कर्षेण वर्तते। नागेत्यत्र आकार
मात्राच्युतके सति नगराज इति। नगानां पर्वतानां राजा नगराजः हिमाचलः जयति। आकारच्युतके सति उक्तविशेषणानि हि
माचलस्य लगंति॥ ५९॥ इति मात्राच्युतकं॥ छ॥ इदानीं बिंदुच्युतकमुदाहरति। सुरूपामेति। सुरूपा माशोभनाचासोरूपामात
। चंदनवती। चंदने वर्त्तीत यस्यां सा। कांता स्त्री तिलकभूषिता। तिलकेन पत्रतिलकेन भूषिता अलंकृता अनंगरूः कंदर्प
रूपिभिः स्थानं। एवंगुणविशिष्टा एषा कांता कस्य भुजंगस्य विटस्य प्रीतिं करोति। अपि तु सर्वस्यापि विटस्यापि प्रीतिं तनोतीति। प
भुजंग रूरित्यत्र विंदोश्च्युतकं कृत्वा एषा नगभूः सर्वत भूरिति भवति विंदुच्युतकानुसापि नगभूः सुरूपा मा भवति रूपा

४८

मतमालोपेतत्वात्। चंदनवती भवति। चंदनवृक्षोपेतत्वात्। कांता मनोहरत्वात्। तिलकभूषितापि तिलकवृक्षोपेतत्वात्। ताह
शी नगभूः कस्य भुजंगस्य सर्पस्य प्रीतिं न करोति। एवं च सति बिंदुच्युतकं भवति॥ ६०॥ अन्यदप्याह। ययेति। यथा। अयं मे
वकुलद्रुमः नकसरवृक्षः सत्प्रसवः सन् समीचीनः प्रसवश्च पुष्पफलं वा यस्य सः। स्पाद्रुत्पादे फले पुष्पे प्रसवो गर्भमोच
न इत्यमरः। स्निग्धः अरूक्षः सन्मार्गविहितस्थितिः। संस्था सोमार्गश्च तत्र विहिता कृता स्थितिर्येन सः। तथोक्तः। तथा स
र्वाश्रयः सार्वेषामाश्रयः सत्यं सत्यमयं मे। वत्यत्र विंदोश्च्युतकात् सत्यं अयं मे वकुलद्रुम इति भवति। कुलवृक्षः। सत्कु
लवृक्षोपि एवंविधो भवति॥ ६१॥ इति बिंदुच्युतकं। इदानीं विसर्गच्युतकमुदाहरति। महीरुहा इति। महीरुहा
वृक्षाः ककलापिनां केन सुखेन सहिताः कलापिनः मयूराः। तेषां अन्येषां विहंगानां च मधुरैः विरुतैः शब्दैः
नीरवाहा यमेघा यस्य आगतानीव। सुष्ठु आगतानीव कुर्वीत। कुर्वीति। अतश्च मधुरैः इत्यत्र विसर्गच्युतकात् म
धुरे। ककलापिनामिति भवति। तथा च मधुरमेव एक केवलं पंतीत्येवं शीला गायविहंगाः तेषां विरुतैः शब्दैरिति सं
बंधः। एकं एककमित्यपि भवति। एकादाकृतिका सहाय इति पाणिनिस्मरणात्। एकाकी त्वेक एककः इत्यमरः॥ ६२॥
अन्यदप्याह। अगस्त्येति। अगस्त्यस्य मुनेः शापात् अस्त्रस्पंदने। अस्त्ररथे आस्थितः आश्रितः सन् महासुः महा
प्राणः खात् आकाशात्। नहुषः राजा परिभ्रष्टः। सन् सर्पतां गतः। महासुरवादित्यत्र विसर्गच्युतकात् समहासुरवा
न् परिभ्रष्ट इति अर्थो तिरंच॥ ६३॥ इति विसर्गच्युतकं। इदानीं अक्षरच्युतकमुदाहरति। महानिति। महत्तेन पिसुधी

रोपि न करं अतोपि सन् विरसः शृंगारादिरसरहितः।। पदेऽवि रुद्धदकः। खारवान् शृंगारादौ विशेषी। यदि
णो रागे द्रवे रस इत्यमरः। ऊर्जितपरिवारः परिजनो यस्य सः स्याज्जंगमे परिवार इत्यमरः। एवंविधः नदीनः नदीनां इ
नः स्वामी समुद्रः केन सेव्यते। नदीन इत्यत्र आद्यदकार प्लुतकान् दीन इति भवति। एवं गुणविशिष्टो दीनः रूप
णः कुन सेव्यते न केनापीत्यर्थः।। ६४ अन्यदप्यादृ।। सुशील इति। सुशीलः शोभनं शीलं स्वभावो यस्य सः। शीलं
स्वभावे सद्वृत्त इत्यमरः। स्वर्णगौरांगः स्वर्णवत् गौरं अंगं यस्य सः। पूर्णचंद्रनिभाननः पूर्णचंद्रेण निभं
तुल्य आननं मुखं यस्य सः। एवं गुणविशिष्टः सु गतः बुद्धः सर्वज्ञः सुगतो बुद्ध इत्यमरः। हृदि हृद
ये संस्थितः सन् कस्य प्रीतिं न तनोति। अपि तु स र्वस्यापि सुगत इत्यत्र मध्यमकार प्लुतकात् सुतः पुत्र
ः न कृ गुणविशिष्टो हृदि वक्षःस्थले संस्थितः स न् कस्य प्रीतिं न तनोति। अपि तु सर्वस्यापीत्यर्थः।।
६५ इत्यक्षरप्लुतकं।। इदानीं स्थानप्लुतकमुदाहरति। तनोत्विति। अस्मत् देह कृष्णवर्णः आसोस्फुरन् मुरारिः
तनयं कल्याणं तनोतु। वितरतु। नदि कल्याणे वचने। सकः। यस्य राज्या फणी शेषः। यस्य दयिता पद्मा लक्ष्मी
ः यस्य पाणौ चक्रं यस्य गतिः गरुत्मान् यस्य नाभौ विरिंचिः ब्रह्मा एवं यस्य पदस्य यत्र स्थानं तस्मात् स्थानात्
प्लुतमिति स्थानप्लुतकं।। ६६ अन्यदप्यादृ।। इन्द्र इति।। इन्द्रः क्षितिजिह्वाश्रितः चंद्रः कृती।। विवस्वान् सूर्यः तापकरः
। संतापकारी। सुरेशः इंद्रः गोत्ररिपुः सर्वतः शत्रुः। अद्रिगोत्रगिरिग्रावा इत्यमरः। विधिः ब्रह्मा। शांतः इति

५९

तत्र तत्र दूषणानि शशाकृष्ण कया उपेत्य शाचालक्ष्मा वृतः परिणीतः हरिः कृष्णः जगंति पातु रक्षतु। अत्रापि स्थ
स्थानात् प्लुतमिति स्थानप्लुतकं। इह केचित्तु ईदृशं स्थानप्लुतकं कथयंति। पूर्वं पद्मस्याद्यं दलं लिखेत्। ततः
स्तस्याधः द्वितीयं दलं लिखेत्। ततश्च पूर्वदलोत्तरदलपदान्वये कृते सत्यर्थबोधः। नान्यथेति। तदेवोदाहरति।। ८।।

प्रिये	मद	श्चंद्रमसि	सिख्यापि	साख्यापि	हृती	किमदं	वदात्र	उक्तरीत्या उदाहरणमन्यदप्ये
गतो	भव	स्स्फुरति	प्रबुद्धा	गताश्च	नष्टा	करवाणि	चिंता	वं स्थानप्लुतकं कादिति द्वेस्ताये

त्वितिस्थानप्लुतकं।। ६७ इति स्थानप्लुतकं।। इदानीं व्यंजनप्लुतकमुदाहरति। मगधे मगधादातापरं अत्यर्थं सार्व
भौमवो दृश्यंत। कीदृशाः रुचिराः मनोहराः। सु रसाः काव्यादिरसोपेता अतः जनप्रियाश्च कुमायां।।
शांतो अभिसंपन्नाः जिह्व इत्यत्रालति व्यंज न प्लुतकात् इच्छव इति भवति। इक्षुदंडा अपि एवं
विधा भवंति। मगधदेशे।। ६८ अन्यदप्यादृ।। स त्यति। सत्यशीलः सत्यस्वभावः। दयो येतः दयायु
क्तः दाता पद्धे धर्मोपदेशदाता। शुचिः निर्मलः अमत्सरः। मत्सररहितः। मत्सरोन्यशुभद्वेषीत्यमरः। एवंवि
विधः जिनः अर्हत्पदे अभीप्सितादुरूपेण सर्वात्मना सर्वप्रकारेण सेव्यः। जिन इत्यत्र जलति व्यंजनप्लुत
कात् इनः स्वामी सेव्यः।। ६९ इति व्यंजनप्लुतकं। इदानीं प्लुतदशाक्षरमभिधानं तस्य लक्षणमाह। स्फुट
यिचेति। किंचित् अक्षरं स्फोटयित्वा पद्ये कस्मिन्नपि पदे किंचित् अक्षरं दूरीकृत्य पुनः अन्यस्य वर्णस्य न

स्मिन्नेवस्थले दानतः निक्षेपात् यत्र वाक्ये अपरः अर्थो भवेत् न तत् सुतदत्ताक्षरं भवेत् इति निश्चयेन॥७०॥ इदा
नीं सुतदत्ताक्षरमुदाहरति। सादेति॥ सदागतिहतोछ्रायः सदागतिना वायुना हतः उछ्रायः उन्नत्वं यस्य
सः मातरिश्वा सदागतिरित्यमरः॥ पक्षे सदागत्या सदागमनेन हतः उछ्रायः महत्त्वं यस्य सः। तमसः अंध
कारस्य पक्षे दारिद्र्यस्य वश्यतां अधीनतां गतः प्राप्तः सन् अयं दीपः अस्तं नाशं एष्यति प्राप्स्यति एकः वि
धुः चंद्रः शिवशीर्षस्थितः दीपोयमित्यत्र मध्यमाक्षरं पकारं दूरीकृत्य पुनस्तत्र वनकारं दत्वा दीनोयमिति
भवति। एवंगुणविशिष्टः दीनः अस्तं एष्यतीत्य र्थः। विधुरे सति आपदि सत्यां शिवाद्यमेकः स्थितो
भवति॥७१॥ अन्यदप्याह॥ हर्षचिंद्रेति। हर्षचिं द्रमुखी। हर्षचिंद्रवन्मुखं यस्याः सा पाठे हर्षचिंद्र
प्रवन्मुखं यस्याः सा रम्या। रम्यं योग्या। पक्षे मनो हरा। निर्मलांबरा। निर्मलं अंबरं वस्त्रं पक्षे गगनं य
स्याः सा॥ [illegible]रं व्योम्नि वाससीत्यमरः। एवंविधा कामिनी स्त्री एकांतकस्य स्वांतं चित्तं मदनातुरं कामाकुलं न
करोति। अपि तु सर्वस्यापि। कामिनीत्यत्र आद्याक्षरं ककारं दूरीकृत्य तत्र यकारं दत्वा यामिनीति भवति। ए
वंगुणविशिष्टा यामिनी रात्रिः एकांतस्य चित्तं मदनातुरं न करोति। अपि तु सर्वस्येवेत्यर्थः॥ रजनी या
मिनी तमीत्यमरः॥७२ इति सुतदत्ताक्षरजातिः॥ इति [illegible]कृतायां विदग्धमुखमंडनस्य टीकायां च
ये[illegible] निष्टर्चमीलिकष्टापदाख्यश्चतुर्थः परिच्छेदः॥४॥ इति विदग्धमुखमंडनस्य टीका समाप्ता॥ ॥श्री
श्रीवाग[illegible] पारवदोपदेशात् [illegible] लेखापितं॥ ॥४॥